CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री महेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया एकविंशं पुष्पम्

व्याकरणप्रवेशिका

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्या. 365 R.

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयस्य एकविंशं पुष्पम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य अर्हतापरीक्षा-(संस्कृतभाषाप्रशिक्षण)-

-पाठ्यपुस्तकरूपेण

प्रणीताऽनिवार्यसंस्कृतव्याकरणबोधिनी

पुस्तिका

व्याकरणप्रवेशिका

लेखकाः

सहप्रा. श्रीस्थानेश्वरगौतमः

सहप्रा. डा. श्रीविष्णुप्रसाददेवकोटाः

उपप्रा. श्रीरमेशढकालः

सम्पादकः

सहप्रा. श्री दुर्गादत्तशर्मोपाध्यायः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालय बेलझुण्डी,दाङ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक:

महेन्द्रसंस्कृतविश्वविद्यालयः

वेलझुण्डी, दाङ्

प्रकाशनम्

प्रथमं संस्करणम्, २०५४ अक्षयतृतीया

प्रकाशितपुस्तकानि -१००० प्रतिरूपाणि

मूल्यम् - रु. १०० रूप्यकाणि

कम्प्यूटरङ्कणम्

क्वालिटी कम्प्यूटर इन्टिच्यूट

पुतलीसडक काठमाण्डौं

फोन नं. २२५९३५

मुद्रक :

नेपाल प्रिन्टर्स एण्ड ट्रेडर्स कोअपरेटीभ लि.

डिल्लीबजार, काठमाडौं फोन नं. ४२७४५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

०प्रा. ३६६ R.

सम्मतिः

नेपालस्य परम्परागतसंस्कृतेःराष्ट्रभाषाया राष्ट्रियभाषाणामितिहासस्य जनजीवनदर्शनस्य परम्पराया आचारविचारव्यवहारादेः साहित्यस्य कलायाश्च सौन्दर्य-विधायकं प्राणाधायकं चिरन्तनं रत्नं संस्कृत मेवेति विदितमस्ति सर्वेषाम् । तस्यैव रत्नस्य संरक्षणसंवर्धनप्रचारप्रसारादिकार्यजातैः सर्वत्र नूतनजीवनसञ्चाराय प्रयतमानोयं महेन्द्रसंस्कृतविश्वविद्यालयो विविधान् कार्यक्रमान् सञ्चालयन्नस्ति । तेषु संस्कृतभाषाप्रशिक्षणकार्यक्रमोऽन्यतमो वर्तते ।

संस्कृतेतरशिक्षणप्रतिष्ठानेष्वधीयानेभ्यः संस्कृतजिज्ञासुभ्यः प्रशिक्षार्थिभ्यः छात्रेभ्यः संस्कृतव्याकरणस्याधारभूतं ज्ञानं वितरितुं भाषाप्रशिक्षणकार्यक्रमानुसारिपाठ्यपुस्तकस्याभावमनुभूय पूर्वं शिक्षाध्यक्षपदकार्यभारवहनं कुर्वता मया व्याकरणविषयविशेषज्ञा विद्वांसोऽभिप्रेरिता आसन् । इदानीं तैः प्रणीतस्य पुस्तकस्यास्य प्रकाशनं जायत इति विज्ञाय नितरां प्रसीदति मे हृदयम् ।

पुस्तकमिदमनुसृत्य युगानुकुलशिक्षणविधिमङ्गीकृत्य मनोविज्ञानञ्चात्मसात्कृत्य शिक्षकाः पाठयेयुः प्रशिक्षार्थिनश्च धैर्यं रुचिं जिज्ञासां श्रद्धाञ्च पुरस्कृत्य पठेयुरेतेन शिक्षकाः शिक्षणे छात्राश्च संस्कृतव्याकरणज्ञानार्जने सफला भविष्यन्तीति मदीयाऽऽत्मीया सम्मतिरस्ति।

मदीयामिच्छां प्रेरणाञ्च सहर्षमङ्गीकृत्य प्रशिक्षार्थिछात्रजनोपयोगिनः व्याकरणप्रवेशिकाभिधस्य पाठयपुस्तकस्य लेखकेभ्यो विद्वद्भ्यो धन्यवादान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वितीर्य विविधानि वाधाव्यवधानानि अविगणय्य पाठ्यपुस्तकस्यास्य साधु सम्पादनं टङ्कणप्रारूपशोधनादिकार्यञ्च कृतवते विदुषे सहप्रा. श्रीदुर्गादत्तशर्मोपाध्यायमहाभागाय भूरिशः साधुवादान् प्रयच्छामि ।

अन्ते च ग्रन्थस्यास्य शीघ्रतया प्रकाशनेन प्रशिक्षार्थिछात्रहितमाचद्भ्यो म.सं.वि. शिक्षाध्यक्षेभ्यः प्रा.डा. बाबुरामापोखे्रलमहोदयेभ्यः साधुवादं वितरन् संस्कृतशिक्षाया व्याप्तिं समृद्धिञ्च कामयमानो विरमामि ।

अक्षयतृतीया २०५४

माधवराजगौतमः
उपकुलपतिः
महेन्द्रसंस्कृतविश्वविद्यालयः

Acc. २३५३२/23532

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशकीयम्

संस्कृतवाङ्मयस्य सर्वतोमुखविकासेन सहैव जनसामान्येऽपि संस्कृतनिष्ठं ज्ञानविज्ञानगतं लाभं प्रापयितुं संस्कृतवाङ्मयगतं धार्मिकं सांस्कृतिकमैतिहासिकं व्यावहारिकं प्राविधिकं सर्वमपि ज्ञानविज्ञान–राशिं प्रकाश्य राष्ट्रस्य सर्वविधविकासाय योगक्षेमवहां जनशक्तिमुत्पादयितुं बद्धपरिकरेण विश्वविद्यालयेनानेन तदर्थं बहवः कार्यक्रमाः सञ्चाल्यमानाः सन्तिं ।

अथ च विश्वविद्यालयेऽस्मिन्नुत्तरमध्यमकक्षायां प्रविविक्षूणां संस्कृताध्ययनं विना प्रवेशिकापरीक्षोत्तीर्णानां छात्रणां कृते भाषाप्रशिक्षणरूपाया अर्हतापरीक्षायाः कार्यक्रमे स्वीकृतेऽपि एकत्र पाठ्यसामग्रीणामभावाच्छात्रैः शिक्षकैश्च महत् काठिन्यमनुभूयमानमासीत्। तत्समस्यानिराकरणाय वर्तमानैरुपकुलपतिभिः श्रीमाधवराजगौतममहानुभावैः पूर्वमत्र शिक्षाध्यक्ष्यपदभारवहनसमये व्याकरणविषयविशेषज्ञाः पाठ्यपुस्तकनिर्माणाय प्रवर्त्तिता आसन् । तैः प्रणीतं पुस्तकमिदं सम्प्रति प्रकाश्यमानमस्तीति महतः प्रमोदस्य विषयः ।

तत्र प्रथममस्य पुस्तकस्य लेखनसम्पादनादिसमस्तकार्येषु ससौमनस्यं मूल्यवतीं प्रेरणां प्रयच्छद्भ्य उपकुलपतिमहोदयेभ्यो हार्दिकीं कृतज्ञतां व्यनज्मि ।

पुस्तकस्यास्य लेखने संयोजने च कृतश्रमा अनुभविनो विद्वांसः सहप्रा.डा. श्रीविष्णुप्रसाददेवकोटा-सहप्रा. श्रीस्थानेश्वरगौतम-उपप्रा. श्री रमेशप्रसादढकालमहाभागा धन्यवादार्हाः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव पुस्तकस्यास्य सम्पादने टङ्कणप्रारूपशोधनादौ च कृतभूरिप्रयासः सहप्रा. श्रीदुर्गादत्तशर्मोपाध्यायमहाभागश्च धन्यवादार्हः। अत्रत्यास्त्रुटीर्न्यूनताश्च निर्दिश्य यथासम्भवं पाठ्यपुस्तकसुधाराय साहाय्यं विधास्यन्ति सम्बन्धिनो विद्वांस इत्याशास्यते ।

यदीदं पुस्तकं सम्बद्धच्छात्राणामन्येषाञ्च संस्कृतजिज्ञासूनां लाभाय स्यात्तदैव विश्वविद्यालयस्यारम्भोऽयं सार्थक्यं लभेत ।

बाबुरामपोखे्रलः

अक्षयतृतीया २०५४

शिक्षाध्यक्षः

महेन्द्रसंस्कृतविश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादकीयम्

बहुमासव्यापिनाऽऽयासेन व्याकरणप्रवेशिकेयं साधु सम्पाद्य कम्प्यूटरटङ्कणञ्च विधाय प्रकाशमानीतेति प्रसीदति मदीयं मानसम् ।

लेखकैर्विद्वद्भिः पाठ्क्रममनुसृत्य नवीनया छात्रमनोविज्ञानानुकूलया सरण्या ग्रन्थोऽयं प्रणीतः । यथा संस्कृतव्याकरणप्रविविक्षूणामावश्यकी पृष्ठभूमिः क्रमशश्छात्रहृदये निधेयं सन्तुलितं व्याकरणतत्वं विश्लेषणपरिपाटी चापेक्षिताऽऽसीत् तथाऽत्र तेषां तत्त्वानां विन्यासे लेखकैर्महान् आयासो विहितः ।

अत्र पाणिनीयसूत्राणामनुवृत्तिज्ञानाय, विविधोपसर्गसम्बधानां धातूनां विविधार्थबोधाय सारल्येन शब्दरूपधातुरूपपरिचयायाऽनुवादविधेरवगमाय वाक्यनिर्माणप्रक्रियाज्ञानाय च या नूतना शैली प्रतिपादिता सा विशेषतः स्पृहणीयाऽस्ति । संस्कृतभाषाप्रशिक्षार्थिछात्राणां कृतेऽपूर्वोयं ग्रन्थः छात्रान् सन्तोष्य शिक्षकाणां मनसि कमप्युल्लासमासादयिष्यतीति मे विश्वासः ।

किञ्च भाषाप्रशिक्षण पाठ्यक्रमे व्याकरण विषये पञ्च प्रकरणानि एवं दत्तानि सन्ति ।

(क) संज्ञासन्धि परिचयः (ख) सुबन्तशिक्षणं नामरूपावलिनिरूपणं च । (ग) धातुरूपावलिनिरूपणम् । (घ) अनुवादशिक्षणम् (ङ) निबन्ध रचना ।

लेखकैरपि यथाक्रमं तानि प्रकरणान्यनुसृत्यैव पाठ्यपुस्तकं रचितमस्ति । किन्त्वत्र तस्य सम्पादने आकारसौष्ठवधिया पुस्तकस्य त्रयो भागाः विहिताः सन्ति । एवम्-

(क) (ख) प्रकरणात्मकः प्रथमो भागः (ग) प्रकरणात्मको द्वितीयो भागः

(घ) (ङ) प्रकरणात्मकश्च तृतीयो भाग इति विभज्य तेच भागाः आवरणपत्रेण पृथक् कृताः सन्ति ।

अस्य पुस्तकस्य सम्पादनायावसरप्रदायकेभ्यः स्नेहसौजन्यसौहार्दा दिगुणमहनीयेभ्य उपकुलपतिश्रीमाधवराजगौतममहोदयेभ्यः शिक्षाध्यक्ष प्रा.डा.श्रीबाबुरामपोख्रलमहोदयेभ्यश्च हार्दिकीं कृतज्ञताकुसुमाञ्जलिमुपहरन् कृतभूरिश्रमेभ्यो लेखकविद्वद्भ्यो धन्यवादं वितीर्य मदीयनुरोधपारवश्यात् कम्प्यूटरटङ्कितस्यास्य पुस्तकस्य प्रकाशनोपयोगिरूपरेखाऽऽकलने महनीयं सहयोगं विदधद्भ्यो विद्वत्प्रवरेभ्यः सुहृद्भ्यः डा. श्रीवेणीमाधवढकालमहानुभावेभ्यः कृतज्ञतारूपमुपहारं समर्पयामि ।

अन्ते च क्वालिटीकम्प्यूटरसंस्थानस्य प्रवन्धकाय श्रीप्रतापबस्न्यातमहोदयाय टङ्कणकार्यकर्त्रे श्रीभरतखतिवडावमंणे तत्रत्येभ्योऽन्येभ्यः सहयोगिभ्यश्च साधुवादं व्याहरन् वाग्देवीचरणार- विन्दयोरात्मानं निवेदयन् विरमामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूची

	पाठः	विषयः	पृष्ठम्
१	प्रथमपाठः	संज्ञाप्रकरणम्	१
२.	द्वितीयपाठः	सन्धिप्रकरणम्	११
३.	तृतीयपाठः	लिङ्गवचनबोधः	२०
४.	चतुर्थपाठः	कारकं तत्परिचयश्च	२७
५.	पञ्चमपाठः	अव्ययोपसर्गौ	३५
६.	षष्ठपाठः	सुबन्तशिक्षणम्	४७
७.	सप्तमपाठः	तसिलादिप्रयोगः	८१
८.	अष्टमपाठः	तिङन्तपरिचयो भ्वादिश्च	९०
९.	नवमपाठः	अदादयः	१४२
१०.	दशमपाठः	दिवादयः	१५१
११.	एकादशपाठः	अनुवादशिक्षणम् पदनिरूपणम्	१७६
१२.	द्वादशपाठः	कारकप्रयोगः	१७९
१३.	त्रयोदशपाठः	सर्वनामविशेषणप्रयोगः	२२४
१४	चतुदर्शपाठः	णिजन्तकृदन्तादिप्रयोगः	२३२
१५.	पञ्चदशपाठः	निबन्धरचनाशिक्षणम्	२४१
१६	प्रश्नपत्राणि		२५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याकरणप्रवेशिका

(प्रथमभागः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तावना

अत्र जगति अद्ययावदुपलब्धासु भाषासु सर्वप्राचीना संस्कृतभाषा । तस्याः संस्कृतभाषाया व्याकरणेषु बहुष्वपि लोकवेदसाधारणतया पाणिनीयं व्याकरणमेव मूर्धन्यतममित्यत्र सर्वेषामैकमत्यम् । अतएवोक्तं पराशरोपपुराणे -

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥"

तत्र भवान् पाणिनिः कदा जनिं लेभे इति विषये अत्यर्वाचीनतावादिनोऽपि इ.पू. चतुर्थशताब्द्यां जन्म लेभे इत्यामनन्ति । परन्तु युधिष्ठिरमीमांसको बहुभि : प्रमाणैः पाणिनेर्जन्मसमय : वि.पू. २९०० इति साधयति । असौ वर्षोपाध्यायशिष्यः दाक्षीपुत्र : सलातुर- (लाहौर) ग्रामाभिजन आसीत् ।

अनेन रचितो विश्वप्रसिद्धोऽष्टाध्यायी नामा ग्रन्थ : ग्रन्थनामानुसारेण अष्टसु अध्यायेषु विभक्तः ।
पुनश्च प्रत्यध्यायं चतुर्षु पादेषु विभक्तः समष्ट्या चतुः सहस्रसूत्रात्मकोऽस्ति ।
पाणिनीयाया अष्टाध्याय्या व्याख्यानस्य द्वे सरण्यौ स्तः, सूत्रक्रमानुसारिणी प्रक्रियानुसारिणी च । सूत्रक्रमानुसारिण्यां पद्धतौ शब्दानां साधनं कठिनं भवति, तत्तत्सूत्राणामनेकेष्वध्यायेषु पादेषु च विकीर्णत्वात् । अतः-

प्रक्रियासरणिमनुसृत्य ईशवीयसप्तदशशताब्द्यां स्थितेन महावैयाकरणेन लक्ष्मीधरसूनुना (शेषकृष्ण शिष्येण) श्रीमद्भट्टोजिदीक्षितेन सकलसूत्राणां व्याख्यानात्मिका "वैयाकरणसिद्धान्तकौमुदी" विरचिता । तच्छिष्येण श्रीमता वरदराजेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैयाकरणसिद्धान्तकौमुद्या : सारं गृहीत्वा "मध्यसिद्धान्तकौमुदी" , ततोऽपि सारं गृहीत्वा "लघुसिद्धान्त कौमुदी" रचिते ।

अस्यां प्रक्रियासरण्यामपि सूत्राणामर्थकरणं कठिनं भवति , तत्तत्प्रयोगसधकानां तत्तदध्यायपादस्य सूत्राणां प्रयोगसाधनसारल्याय एकत्र सन्निवेशेन अनुवृत्याद्यसम्भवात् ।

यद्यपि विशेषायासेन संस्कृत-व्याकरणस्य विशेषबोधोदयाय सन्त्येव पूर्वोक्ता अनेके ग्रन्थाः , तथापि सामान्यायासेन संस्कृतभाषां संस्कृतव्याकरणञ्च साधारणतयाधिजिगमिषूणां महेन्द्रसंस्कृतविश्वविद्यालयेन निर्धारितमर्हतापाठ्यक्रममनुसृत्य पाठ्यसामग्री रूपेण विहितायामत्र व्याकरणप्रवेशिकायां निर्धारितसूत्राणां प्रक्रियाक्रमेणैव व्याख्यानेपि सूत्रार्थकरणे आवश्यकानां पदानां सूत्राणाञ्चोल्लेखेन सूत्रार्थः सम्पादितः । अनुवर्त्यपदानां यथाक्रमं संयोजनेनैव सूत्रार्थ: संपद्यते इति नास्ति सूत्रार्थकण्ठस्थीकरणस्यावश्यकतात्र ।

एवञ्चोदाहरण-वाहुल्यम् ,अभ्यासप्रश्नादि-वैविध्यञ्च समावेशितम्।

किञ्च उपसर्गाणामपूर्वप्रयोगदर्शनं, त्रल्तसिलादिप्रत्ययान्तानां प्रयोगप्रकारः निबन्धरचनाभ्यासाय आवश्यकानि तत्वानि अनुवादशिक्षणे विविधोपायाश्च समावेशितानीति सर्वमेतदध्येतृसौकर्यायैव भविष्यति ।

-लेखकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओं नमो वाचे

व्याकरणप्रवेशिका

प्रथमपाठः

संज्ञाप्रकरणम्

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
येन धौताः गिरः पुंसां विमलैश्शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नम : ॥ २ ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥ ३ ॥

पूर्वस्मिन् समये अद्यत्वे इव मुद्रणसामग्र्यो नासन् । अतः सर्वोऽपि विषयः कण्ठस्थीक्रियते स्म । अत एव वेदाः श्रुतयः कथ्यन्ते । अस्यां श्रुतिपरम्परायामुच्चारणानां प्रतिव्यक्ति भिन्नत्वं स्वराणामारोहावरोहयोर्भिन्नत्वञ्चाभूत् । अतस्तदसहमाना महर्षयो व्याकरणमरचयन् । तानि च रचितानि व्याकरणानि विभिन्नकालिकानि अनेकानि संस्कृते । तेषु वैज्ञानिकतया, सर्वाङ्गीणतया लौकिकवैदिकोभयविधात्मकतया च पाणिनीयमेव व्याकरणं सर्वोत्कृष्टम् , तत्रत्यान्येव कतिपयानि अत्यावश्यकानि सूत्राणि सङ्कलय्य पुस्तिकेयं रचिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषतः पाणिनीयानि सूत्राणि अज्झलादिप्रत्याहारमूलकानि। अज्झलादिप्रत्याहाराणाञ्च वर्णसन्निवेशविशेषं विना कर्त्तुमशक्यत्वात् तन्निष्पादकानि वर्णसमाम्नायरूपाणि लाघवेन शास्त्रप्रवृत्त्यर्थानि इष्टवर्णबोधकानि च भगवतो महेश्वरस्य प्रसादाल्लब्धानि चतुर्दशसूत्राणि निबध्यन्ते ।

ॐ अइउण् (१) ऋलृक् (२) एओङ् (३) ऐऔच् (४) हयवरट् (५) लण् (६) ञमङणनम् (७) झभञ् (८) घढधष् (९) जबगडदश् (१०) खफछठथचटतव् (११) कपय् (१२) शषसर् (१३) हल् (१४)

एषामन्त्या इतो भवन्ति । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ।

पाणिनीयस्य व्याकरणशास्त्रस्य प्रवृत्तेः संज्ञामूलकत्वात् पूर्वं का संज्ञा ? कश्च संज्ञी ? इति विचार्यते । यया प्रत्याय्यते सा संज्ञा । ये च प्रतीयन्ते ते संज्ञिनः । यथा इत् इति संज्ञा, अन्त्यो हल्वर्णः, अनुनासिकाजादयश्च संज्ञिनः । अथवा अनाकृतिः संज्ञा, आकृतिमन्तश्च संज्ञिनः । यथा वृध्दिरिति गुण इति च संज्ञा, आदैचः, अदेङश्च संज्ञिनः । लोकेऽप्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते, मांसपिण्डश्च संज्ञी भवति ।

इदादिकतिपयसंज्ञानां विधायकानि चेमानि सूत्राणि

१. उपदेशेऽजनुनासिक इत् (१।३।२)

सर्वत्रैव वाक्ये उद्देश्यविधेयभावो भवति । अत्र चोपदेशेऽनुनासिकाच् उद्देश्यः, इत्संज्ञा च विधेया । अयं सूत्रार्थः उपदेशेऽनुनासिकोऽच् इत्संज्ञः स्यात् । यथासुप्, धुट् इत्यादीनामुकारादीनामनेन सूत्रार्थसङ्घटनादित्संज्ञा भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. हलन्त्यम् (१।३।३)

अत्र अन्त्यं हल् उद्देश्यम्, इच्च विधेयम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयम्, सत्यामावश्यकतायाम् । तेनात्र पूर्वसूत्रात् उपदेशे इति पदम् इत्पदञ्चानुर्त्तते । तेन उपदेशेऽन्त्यं हल् इत् स्यादित्यर्थः । सुप्, धुडित्यादौ पकारटकारयोः , अणादिषु णकारादेश्चानेन इत्संज्ञा भवति ।

३. अदर्शनं लोप : (१।१।६०)

अदर्शनमत्रोद्देश्यम्, लोपश्च विधेयः । अत्र च विद्यमानस्येत्यध्याहारः[1] । तेन विद्यमानस्यादर्शनं लोपसंज्ञं स्यादिति ।

४. तस्य लोपः (१।३।५)

इतं वर्णमुद्दिश्य लोपोऽत्र विधीयते । पूर्वसूत्रादित्पदमनुवर्त्तते , अयमर्थः तस्येतो लोपः स्यात् ।

५आदिरन्त्येन सहेता (१। १।७१)

अत्र अन्त्येन इता वर्णेन सहोच्चारित आदिरुद्देश्यः, अज्झलादिप्रत्याहारसंज्ञा च विधेया । स्वं रूपं शब्दस्याशब्दसंज्ञा, इति पूर्वसूत्रात् स्वमित्यनुवर्त्तते । इत्पदमित्सदृशपरम् । तेन अन्त्येनेता (इत्सदृशेन) सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यादित्यर्थः । अत्र समुदायः संज्ञी, अण्, अक् हलादयश्च संज्ञा । समुदायरूपस्य च संज्ञिन एकत्र लक्ष्ये प्रयोगासम्भवात् प्रत्येकं समुदायघटकानां संज्ञित्वं भवति । अत एव अ इ उ इत्येवमादयः प्रत्येकमजादयः । अन्त्यस्य तु वर्णस्य न संज्ञित्वम् प्रत्याहारेष्वितामग्रहणात् । अण् अगादय उदाहरणानि ।

---

(१). आकाङ्क्षितैकदेशपूरणमध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयञ्चाणादिप्रत्याहारसाधनरीतिः

अण्प्रत्याहारः साधनीयो वर्त्तते । तत्प्रत्याहारे साधनीये कीदृशी स्थितिर्वर्त्तते ? अइउण् इतीदृशी वर्त्तते ।

अस्यां स्थितौ किं सूत्रं प्रवर्त्तते ?

हलन्त्यम्ः इति सूत्रम् । अस्य कोऽर्थः?उपदेशेऽन्त्यं हल् इत् स्यादिति ।

अत्र उपदेशः क ? अइउण् इति[२] । तत्र अन्त्यं हल् किम् ? ण् इति । अत एव सूत्रार्थसङ्घटनात् तस्येत्संज्ञा जाता । अनेनजातायामित्संज्ञायां किं सूत्रं प्रवर्त्तते? अदर्शनं लोपः इति । अस्य कोऽर्थः? विद्यमानस्यादर्शनं लोपसंज्ञं स्यादिति । अनेन णकारस्य भाविसंज्ञाविज्ञानाल्लोपसंज्ञा जाता । ततश्च तस्य लोपः इति सूत्रं प्रवृत्तम् । अनेन इत्संज्ञकस्य लोपसंज्ञकस्य च णकारस्य लोपः सञ्जातः । अत्र णकारादीनां यदि लोपो भवति तर्हि कथं पाठः ? इत्याशङ्का न कार्या, तेषां प्रत्याहारसिद्ध्यर्थमावश्यकत्वात् । तदर्थञ्च लोपस्य आवश्यकत्वम् । ततश्च सूत्रं प्रवृत्तम्-आदिरन्त्येन सहेता इति । अत्र अन्त्येत् सदृशो वर्णः णकारः, तत्सहित आदि : अण् इति । स मध्यगयोः इ-उ वर्णयोः स्वस्य .अकारस्यच संज्ञा= बोधको भवति । तेन अण् इतिपदेन अ-इ-उ वर्णा बुद्ध्यन्ते , गृह्यन्ते च । एवमेव अज्झलादयोऽपि बोध्याः ।

---

(२). उपदेश आद्योच्चारणम् । पाणिनिकात्यायनपतञ्जलीनामाद्य– मुच्चारणम् उपदेश इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्रत्याहारशब्दस्य कोऽर्थ ? प्रत्याह्रियन्ते. संक्षिप्यन्ते वर्णा यत्रेति प्रत्याहारः । प्रतिकार्यमाह्रियन्ते उपस्थाप्यन्तेऽनेन वर्णा इति वा । वर्णसङ्क्षेपकत्वं प्रत्याहारत्वमित्यर्थः ।

कति सन्ति प्रत्याहारा इति जिज्ञासायां पाणिनीयेषु सूत्रेषु प्रयुक्ताः वर्णसमाम्नायसिद्धाश्च एकचत्वारिंशत् प्रत्याहाराः । रप्रत्याहारस्य वार्त्तिकप्रयुक्तचय्प्रत्याहारस्य च संख्याने तु त्रिचत्वारिंशत् ते बोध्याः । ते चेमे-एङ्, यञ्, अण्, छव्, अट्, - ५। भष् झष् - २ । अक् इक् उक् ३। अण् इण्, यण्-३ । अम्, यम् ङम्-३। अच्, इच्, एच्, ऐच्- ४। यय् , मय् , झय्, खय् - ४ । यर् , झर्, खर् , चर् शर्, - ५ । अश्, हश्, वश् , जश्, शश्, बश्, -६ । अल्, हल्, वल् , रल्, झल्, शल् - ६ । वार्त्तिकप्रयुक्तचय्प्रत्याहारः, तवल्कार इत्याद्यर्थो रप्रत्याहारश्च विद्येते । अयं संग्रहः वर्णसमाम्नायसिद्धानां प्रत्याहाराणाम्-

एकस्मान् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाःस्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ॥ इति

६. तुल्यास्यप्रयत्नं सवर्णम् (१।१।९)

तुल्यास्यप्रयत्नं वर्णद्वयमुद्देश्यम्, सवर्णसंज्ञा विधेया । आस्यन्दते = द्रवीभवति अन्नं प्राप्येति आस्यम् । आस्ये भवमास्यम् ताल्वादि । प्रकृष्टो यत्नः प्रयत्नः आभ्यन्तरःस्पृष्टतादिः । एवञ्च तुल्यञ्च तुल्यश्च तुल्यौ । आस्यञ्च प्रयत्नश्च आस्यप्रयत्नौ तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् । तेन-ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च एतद्द्वयं यस्य (वर्णस्य) येन (वर्णेन) तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति । यथा-अकारस्य आकारस्य च स्थानं कण्ठः प्रयत्नो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवृतमिति अनयोः परस्परं सवर्णसंज्ञाऽनेन भवति । प, भ इत्यनयोश्च स्थानप्रयत्नतुल्यत्वात् मिथःसवर्णत्वम् ।

स्थानञ्चेदं द्विविधम्- असङ्कीर्णम्, सङ्कीर्णञ्च । तत्र असङ्कीर्णमष्टविधम्-१ अकुहविसर्जनीयानां कण्ठः । २- इचुयशानां तालु ३- ऋटुरषाणां मूर्धा । ४- लृतुलसानां दन्ताः । ५- उपूपध्मानीयानामोष्ठौ । ६- ञमङणनानां नासिका च । ७- जिह्वामूलीयस्य जिह्वामूलम् ।

८- नासिकाऽनुस्वारस्य । सङ्कीर्णञ्च त्रिविधम्-

१ एदैतोः कण्ठतालु । २ ओदौतोः कण्ठोष्ठम् । ३ वकारस्य दन्तोष्ठम् । सङ्कीर्णता चात्र स्थानद्वयान्वयनिबन्धना स्थानद्वयोच्चारितत्वं वा । अष्टौ स्थानानि वर्णानाम् इति पाणिनीयशिक्षा च असङ्कीर्णस्थानबोधिका । प्रयोजनवशात् तु सङ्कीर्णान्यपि उल्लिखितानि शास्त्रकृत्सम्मतानि ।

यत्नस्तु द्विविधः- आभ्यन्तरो बाह्यश्च । आभ्यन्तरः पञ्चधा-१ स्पृष्टम् । २-ईषत्स्पृष्टम् । ३ ईषद्विवृतम् । ४ विवृतम् । ५ सम्वृतञ्च । तत्र स्पृष्टं प्रयत्नं कादिमावसानानां स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानां यणाम् । ईषद्विवृतमूष्मणां शलाम् । विवृतमचाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायान्तु विवृतमेव । बाह्यप्रयत्नस्त्वेकादशधा । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तो ऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः सम्वारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । सुपां सुलुगिति सूत्रस्य इकारस्यान्तर्यतो दकार इति भाष्यात् यणश्चेत्यत्र चेन च अचां संग्रहात् अचां संवारनादघोषाल्पप्राणा अपि बाह्यप्रयत्ने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानबोधककोष्ठम्-

स्थानानि-	कण्ठ	तालु	मूर्धा	दन्ताः	ओष्ठौ	नासिका	कं.ता.	कं.ओ.	दं.ओ.	जि.मू.
वर्णाः-	अ	इ	ऋ	लृ	उ	ञ	ए	ओ	व	:क
	क	च	ट	त	प	म	ऐ	औ		:ख
	ख	छ	ठ	थ	फ	ङ				
	ग	ज	ड	द	ब	ण				
	घ	झ	ढ	ध	भ	न				
	ङ	ञ	ण	न	म					
	ह	य	र	ल	:प					
	:	श	ष	स	:फ					

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आभ्यन्तरबाह्यप्रयत्नबोधककोष्ठम्-

आभ्यन्तर प्रयत्नाः	स्पृष्टम्				ईषत्स्पृष्टम्	ईषद्विवृतम		विवृतम	संवृतम
संज्ञा	स्पर्शाः				अन्तःस्थाः	ऊष्माणः		स्वराः	
वर्णाः	क च ट त प	ख छ ठ थ फ	ग ङ ज ञ ड ण द न ब म	घ झ ढ ध भ	य व र ल	श ष स	ह	अ इ उ ऋ लृ ए ऐ ओ औ	ह्रस्वस्या वर्णस्य प्रयोगे
बाह्यप्रयत्नाः	अ. प्रा. विवाराः श्वासाः अघोषाः	म. प्रा.	अ.प्रा. संवाराः नादाः घोषाः	म.प्रा. संवाराः नादाः घोषाः	अ.प्रा. संवाराः नादाः घोषाः	म.प्रा. विवाराः श्वासाः अघोषाः	म.प्रा. संवा. नादाः घोषाः	उदात्ताः,अनुदात्ताः, स्वरिताः,संवाराः, नादाः,घोषाः, अल्पप्राणाश्च	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासः

प्रश्नाः

१. वर्णसमाम्नायस्य का आवश्यकता ?

२. किं नाम प्रत्याहारत्वम् ?

३. यरशवर्णानां किं स्थानम् ?

४. ङचसइवर्णानां क आभ्यन्तर-प्रयत्नः ?

५. अच्प्रत्याहारे कति बर्णाः समायान्ति ? के च ते ?

६. इच्प्रत्याहारसाधनरीतिः का ?

७. परस्परं मेलयत-

क. कण्ठः　　क. लृतुलसानाम् ।

ख. कण्ठोष्ठम्　ख. उपूपध्मानीयानाम् ।

ग. ओष्ठौ　　ग. इचुयशानाम् ।

घ. तालु　　घ. ओदौतोः ।

ङ. दन्ताः　　ङ. अकुहविसर्जनीयानाम् ।

८. परस्परं मेलयत

क.ईषद्विवृतम्　क. स्पर्शानाम् ।

ख. स्पृष्टम्　　ख. उष्मणाम् ।

ग. विवृतम्　　ग. ह्रस्वस्यावर्णस्य प्रयोगे ।

घ. संवृतम्　　घ. अन्तःस्थानाम् ।

ङ. इषत्स्पृष्टम्　ङ. स्वराणाम् ।

=०=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदसंज्ञा

१. सुप्तिङन्तं पदम् (१।४।१४)

सुप्तिङन्तमुद्दिश्य पदसंज्ञाऽनेन विधीयते । सुप् च तिङ् च सुप्तिङौ, तौ अन्तौ यस्य तत् सुप्तिङन्तम् । सुप् चात्र प्रत्याहारो गृह्यते, न सप्तमीबहुवचनमात्रम् तिङा प्रत्याहारेण साहचर्यात् । तिङ् च तिप्तस्झीति सूत्रे ति इत्यारभ्य ङान्तः प्रत्याहारः । अन्तशब्दो द्वन्द्वान्ते श्रूयमाणतया प्रत्येकमभिसम्बध्यते इति सुबन्तं तिङन्तञ्च पदसंज्ञं स्यादित्यर्थः, रामः, गौरी इत्यादीनि सुबन्तस्य, पठति, गच्छतीत्यादीनि च तिङन्तस्योदाहरणानि ।

२ हलोऽनन्तराः संयोगः (१।१।७)

अनन्तरान् हल उद्दिश्य संयोगसंज्ञा विधीयते । अन्तरम्= व्यवधानम् । तच्च विजातीयैरेव संभवति । हलाञ्च विजातीया अच एवेति अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युरित्यर्थः । टि-घु-भा-दिलघुसंज्ञायां करणीयायां 'संयोग' इति महासंज्ञाकरणादत्र समुदाये वाक्यपरिसमाप्तिर्भवति, न तु गुणवृद्धिसंज्ञावत् प्रत्येकम् । अतोऽनेन द्वयोर्बहूनां वा संयोगसंज्ञा भवति ।

३ वृद्धिरादैच् (१।१।२)

इदं द्विपदं त्रिपदं वा सूत्रम् । आदैचौ उद्देश्यौ । वृद्धिसंज्ञा च विधेया। विधेयत्वेऽपि वृद्धिपदस्य पूर्वं प्रयोगो मङ्गलार्थः । आदैच्च वृद्धिसंज्ञः स्यात् इत्यर्थः । अतो व्याकरणेऽत्र वृद्धिपदेन आ ऐ औवर्णा गृह्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. अदेङ् गुणः (१।१।२)

तपरकरणमिह अकारार्थमपि दीर्घादिव्यावृत्त्यर्थम् । तेनगङ्गोदकम् इत्यादौ त्रिमात्रो गुणो न भवति अत् एङ च गुणसंज्ञः स्यादित्यर्थः । एवञ्चात्र गुणपदेन अएओवर्णा गृह्यन्ते ।

धातुसंज्ञाविधायकं हि सूत्रद्वयमस्ति । तत्र प्रथमम् -

५. भूवादयो धातवः (१।३।१)

भूवादीन् उद्दिश्य धातुसंज्ञाऽनेन विधीयते । दधति क्रियामित्यन्वर्थसंज्ञाकरणेन स्वानुरूपस्य संज्ञिन आक्षेपात् क्रियावाचित्वलाभः । तेन क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युरित्यर्थः । अनेन भू अद्प्रभृतीनां गणपठितानां धातुसंज्ञा विधीयते । द्वितीयन्तु सूत्रम्

६. सनाद्यन्ता धातवः (३।१,३२)

अत्र सनाधन्ता उद्देश्याः धातुत्वञ्च विधेयम् । सनादिप्रत्ययसहितस्य धातुसंज्ञालाभाय अन्तग्रहणम् । सन् आदिर्येषान्ते सनादयः । तेऽन्ताः अवयवा येषान्ते सनाद्यन्ताः । एवञ्चायमर्थः- सनादिप्रत्ययान्तानां धातुसंज्ञा स्यादित्यर्थः। तेन गोपायति, पिपठिषति इत्यादौ गोपायपिपठिपेत्यादीनां धातुसंज्ञायां तिप्शबादिर्भवति । सनादयश्च-

सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा ।
यगाय ईयङ् णिङ्चेति द्वादशामी सनादयः ॥ इति ।

रामः इत्यादौ स्वादीनाम् अजा कुमारीत्यादौ डीप्टाबादिप्रत्ययानाञ्च प्रातिपदिकसंज्ञकाद् विधानं भवति । तद्विधायकञ्च सूत्रद्वयमस्ति । तत्र प्रथमं सूत्रम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१।२।४५)

धातुप्रत्ययभिन्नमर्थवच्छब्दस्वरूपमुद्देश्यम् प्रातिपदिकत्वञ्च विधेयम् । सूत्रे प्रत्ययपदे तन्त्रमस्ति । तन्त्रत्वञ्च सकृदुच्चरितत्वे सति बह्वर्थबोधकत्वम् । एकत्र प्रत्ययपदे तदन्तविधिः । अर्थवदिति नपुंसकनिर्देशात् तदनुकूलं विशेषणं "शब्दस्वरुपम्" इति अध्याह्रियते । अतोऽयमर्थः- धातुं प्रत्ययं प्रत्ययान्तञ्च वर्जयित्वा अर्थवच्छब्दस्वरुपं प्रातिपदिकसंज्ञं स्यात् इति । राममणिनूपुरादीनां शब्दानामनेन प्रातिपदिकसंज्ञा क्रियते । ततश्च स्वाद्युत्पत्तिः । द्वितीयन्तु सूत्रम् -

८. कृत्तद्धितसमासाश्च (१।२।४६)

पूर्वसूत्रात् प्रातिपदिकमित्यनुवर्त्तते । अर्थवत् इति च । तदनुवृत्तिसामर्थ्यात् कृत्तद्धितपदे तदन्तविधिर्भवति । तेनायमर्थः- कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युरिति । पूर्वसूत्रे अधातुपदस्य सत्वेन लिट्, धुक् इत्यादौ तेन प्रातिपदिकसंज्ञाया अप्राप्तौ, कर्त्ता औपगव इत्यादौ च अप्रत्ययान्त इत्यनेन चाप्राप्तौ सूत्रमिदम एधितव्यम्, लेखकः, पाठक इत्यादीनि कृदन्तस्य, राष्ट्रियः ग्रामीण इत्यादीनि तद्धितान्तस्य, राजपुरुषः पीताम्बर इत्यादीनि च समासस्योदाहरणानि बोध्यानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासः

प्रश्नाः

१. सुबन्तस्य तिङन्तस्य च पदसंज्ञायाः पञ्च-पञ्च उदाहरणानि देयानि ।

२. अर्थवदित्यनेन कीदृशस्य प्रातिपदिकत्वम् ?

३. कृत्तद्धितेत्यस्य क उद्देश्यविधेयभावः ?

४. संयोगसंज्ञाविधायकस्य वृद्धिसंज्ञाविधायकस्य च सूत्रस्यार्थं लिखत ।

५.कस्य का संज्ञा भवति ? मेलयत

क. पाठकशब्दस्य	क. गुणसंज्ञा
ख. अदेङाम्	ख. संयोगसंज्ञा
ग. भूवादीनाम्	ग. वृद्धिसंज्ञा
घ. आदैचाम्	घ. धातुसंज्ञा
ङ. अनन्तराणां हलाम्	ङ. प्रातिपदिकसंज्ञा

=०=

द्वितीयपाठः

सन्धिप्रकरणम्

अच्सन्धिः

पूर्वप्रकरणे उपायभूतानामजादिप्रत्याहाराणाम् इदादिसंज्ञानाञ्च निरूपणं विहितम्। इदानीमुपेयभूतोऽजादिसन्धिर्निरूप्यते । तत्र च 'अइउण्'इत्यादिचतुर्दशसूत्रस्य वर्णोद्दिशक्रिमेण अच्सन्धिः प्राप्तावसरः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. इको यणचि (६।१।७७)

इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी +उपास्य इति स्थिते-

२. स्थानेऽन्तरतमः (१।१।५०)

प्रसङ्गे सति सदृशतम आदेशः स्यात्। एतत्सहयोगेन तालुस्थानवत ईकारस्य स्थाने तालुस्थानवान् यकारो भवति। एवञ्च सुध्य् उपास्य इति जाते अज्भीनो वर्णः परं धावति इति न्यायेन वर्णसम्मेलने सुध्युपास्य इति सिद्ध्यति। एवं दध्यानय, प्रत्युपकारः, अत्याचारः, अभ्युदय इत्यादयः। एवमेव मधु + अरिरितिस्थिते। उक्तसूत्रसहयोगेन ओष्ठस्थानवत उकारस्य स्थाने दन्तोष्ठस्थानवान् वकारो यण् भवति। एवं स्वागतम्, अन्वय इत्यादयः। धातृ + अंश इति स्थितौ मूर्धस्थानवत ऋकारस्य स्थाने मूर्धस्थानवान् रेफो भवति। एवं पित्रंशः मात्रंश इति। लृ + आकृतिः इति स्थितौ दन्तस्थानवत लृकारस्य स्थाने तत्स्थानवान् लकारो भवति इति लाकृतिरित्यादि सिद्धयति। एवञ्च इकः, इ, उ, ऋ ,लृ एतेषां स्थाने यण् य् व् र् ल् एते आदेशा सञ्जाता अचि परे।

(एचोऽयवायावः (६।१।७८)

एचः क्रमादय् अव् आय् आव् आदेशाः स्युरचि।

हरये। विष्णवे। नायकः। पावकः। अनयोरपवादः-

ईदूदेद् द्विवचनं प्रगृह्यम् (१।१।११०)

ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। कवी + एतौ। गुरू + आगतौ इत्यादौ न यण्, गङ्गे + अमू इत्यादौ च न अयादयः किन्तु प्रकृतिभावः। स तु स्वस्वरूपेणावस्थानम्।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३. आद्गुणः (६।१।७८)

इको यणचीत्यत अचीत्यनुवर्त्तते । अवर्णादचि परे पूर्वपरयोर्गुणैकादेशः स्यात् । उपेन्द्रः । अत्र उप + इन्द्र इति स्थिते कण्ठस्थानवत अकारस्य तालुस्थानवत इकारस्य च स्थाने कण्ठतालुस्थानवान् एकारो गुणैकादेशो भवति । एवम् खगेन्द्रः । नगेन्द्रः । रमेशः । कलेशः। गङ्गोदकम् । शीतोष्णमित्यादीनि उदाहरणानि बोध्यानि ।

४. वृदिरेचि (६।१।८८)

पूर्वसूत्रात् आदित्यनुवर्त्तते । आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । अत्र कृष्ण + एकत्वमिति स्थितौ स्थानेऽन्तरतमः इति सूत्रसहयोगेन अकारैकारयोः पूर्वपरयोः स्थाने स्थानसाम्यात् ऐकारो भवति । एवं मतैक्यम् । पुत्रैषणा इत्यादयः । तथा गङ्गौघः इत्यत्र गङ्गा+ओघ इति स्थितौ, आकारौकारयोः स्थाने स्थानसाम्यादौकारो भवति । एवं जलौघः । प्रणयौत्कण्ठयम् । मूलौपधम् इत्यादौ औकारो भवति ।

५. अकः सवर्णे दीर्घ (६।१।१०१)

इको यणचीत्यतोऽचीत्यनुवर्त्तते । अकः सवर्णे अचि परे दीर्घैकादेशः स्यात् । दैत्यारिः । दैत्य + अरिरिति स्थिते अकारयोः सवर्णत्वात् स्थानसाम्यात् आकारे दीर्घे वर्णसम्मेलने दैत्यारिः इति सिद्धम् ।

एवं पुस्तकालयः । प्रतीक्षालयः । लक्ष्मीशः । विष्णूदयः । गुरूदयः । होतृकारः । पितृणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(दूराद्धूते च (८।२।८४)

दूरात् संबोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् । एहि कृष्ण ३ अत्र गौश्चरति । सक्तून् पिब देवदत्त ३ इत्याह ।)

६. एङः पदान्तादति (६।१।१०९)

अयवोरपवादः । 'अमि पूर्वः' इत्यतः पूर्व इत्यनुवर्त्तते । पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । अत्र हरे + अव इति स्थितौ अयादेशे प्राप्ते तं प्रबाध्य अनेन पूर्वरूपे सिद्धं रूपम् । एवं सर्वेऽपि, देशेऽस्मिन् , विष्णोऽव, रामोऽयम् , शिवोऽर्च्यः इत्यादयोऽपि बोध्याः । अत्र सर्वत्र अकारः पूर्वरूपताङ्गत इति तच्चिह्नमात्रं खण्डाकारः (ऽ) ।

अभ्यासः

प्रश्नाः

१. सन्धिविच्छेदं कुरुत

क. विभक्त्यर्थाः, देव्युवाच, इत्यादिः, अत्यन्तम्, मध्वस्ति, स्वादिः, भ्वादिः, जामात्रेपणा, मात्रनुग्रहः, पित्रादेशः, होत्रालयः ।

ख. तयागताः, नयनम्, गवेपणा, प्रियायौत्सुक्यम्, चायकः, तावेतौ।

ग. घटेशः, कलशेशः, गङ्गोत्पत्तिः समाचारोल्लेखः, विपयैपणा, मधुरौपधिः, ज्ञानौचित्यम् ।

घ. घटाकाशः, विद्यालयः, लघूदयः, गुरूर्णा, गौरीशः,फलेऽस्मिन् । देवोऽर्च्यः। देवोऽयम् ।

२. परस्पर मेलयत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क. यण् क. एङः पदान्तादति

ख. गुणः ख. अकः सवर्णेदीर्घः

ग. वृद्धिः ग. आद्गुणः

घ. दीर्घः घ. इको यणचि

ङ. पूर्वरूपम् ङ. वृद्धिरेचि

३. सन्धिं कुरुत

नदी + उदकम् । इति + आह । गुरु + आदेशः । मातृ+ अनुमतिः । हित +उपदेशः । रमा + इशः । अद्य + एव । तथा + एव । परम + औपधम् । हिम + आलयः । गुरु + उपदेशः । क्षिति + ईशः । मधु + उत्सवः ।

४. अधोलिखितान् प्रयोगान् साधयत

दध्यानय । मध्वरिः । उपेन्द्रः । दैत्यारिः । हरेऽव ।

हल्सन्धिः

वर्णसमाम्नाये अच उपदिश्य हलामुपदेशात् तदुद्देशक्रमेण अच्सन्धिनिरूपणानन्तरं हल्सन्धिर्निरूप्यते -

१. स्तोः श्चुना श्चुः (८/४/४०)

अत्र स्थान्यादेशयोर्यथासंख्यम्, न तु निमित्तकार्यिणोः । तथाचायं सूत्रार्थः सकारस्य शकारेण चवर्गेण वा योगे शकारो भवति, तवर्गस्य च शकारेण चवर्गेण वा योगे च चवर्गो भवति । रामश्शेते । अत्र रामस् + शेते इति स्थितौ शकारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगेन सकारस्य स्थाने शकारो भवति इति सिद्ध्यति तत् । एवं विष्णुश्शान्तः । रामश्चिनोति । विष्णुश्चिन्तितः । सच्चित् । तज्जालम् । सच्छास्त्रम् । सच्छीलम् । शार्ङ्गिञ्जय ।

२. ष्टुना ष्टुः (८।४।४१)

अत्रापि स्थानिनिमित्तयोर्यथासंख्यं न, किन्तु निमित्तकार्यिणोरेव । सकारस्य षकारेण टवर्गेण वा योगे षकारो भवति, तवर्गस्य षकारेण टवर्गेण वा योगे टवर्गो भवति इत्यर्थः । रामष्षष्ठः । अत्र रामस् + षष्ठ इति स्थिते षकारस्य योगात् ततः पूर्वस्य रामघटकस्य सकारस्य ष्टुत्वे षकारो भवति । एवं मनोहरष्षट्पदः । रामष्टीकते । सुन्दरष्टकारः । तट्टीका । प्रविष्टः। उड्डीनः । चक्रिण्ढौकसे ।

३. झलां जशोऽन्ते (८।२।३९)

पदस्येत्यनुवर्त्तते । पदान्ते झलां जशः स्युः। अजन्तः । अत्र अच् + अन्त इति स्थितेऽनेन जश्त्वेन जकारः । एवम् अजादिः । सुवन्तः । अनुष्टुब् । वागीशः । वाग्दानम् । षड्दर्शनम् । तदुक्तम् । जगद्बन्धुः ।

४. मोऽनुस्वारः (८।३।२३)

'हलि सर्वेषाम्' इति पूर्वसूत्रात् 'हलि' इत्यनुवर्त्तते । पदस्येत्यधिकृतं मस्य विशेष्यं भवति । एवञ्च मान्तस्य पदस्यानुस्वारः स्याद् हलि इत्यर्थः । हरिं वन्दे । अत्र हरिम्+वन्दे इति स्थितौ 'अलोऽन्त्यस्य' इति सूत्रबलेन मान्तपदस्य हरिमित्यस्य मकारमात्रस्य स्थानेऽनुस्वारे सिद्धं भवति रूपम् । एवं देवं प्रणमामि । साधुं नमस्करोमि । चलचित्रं पश्यामि इत्यादीन्यपि बोध्यानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. शश्छोऽटि (८।४।६४)

अत्र पदान्तात् इति 'झयो होऽन्यतरस्यामिति पूर्णं सूत्रञ्चानुवर्तते। पदान्ताज्झयः परस्य शस्य छो वा स्यादटि' इति सूत्रार्थः । तच्छिवः । अत्र तद्+शिव इति स्थितौ अनेन छत्वे दस्य श्चुत्वेन जकारे 'खरि च' इति चर्त्वेन चकारे रूपं सिद्धं भवति । एवं तच्छक्तिः । तच्छीलम्। तच्छास्त्रमित्यादि ।

६. खरवसानयोर्विसर्जनीयः (८।३।१५)

विसर्जनीयो विसर्गः (: इत्येवंरूपः) "रो रि " इत्यतो र इत्यनुवर्त्तते। पदस्येति प्रकृतं तद्विशेषणं भवति-अवसाने खरि च परे पदान्तस्य रेफस्य विसर्जनीयः स्यात् । हरिः । राम इति अवसाने वर्त्तमानस्य रेफस्य स्थाने जातस्य विसर्गस्योदाहरणम् । अत्र पूर्वप्रक्रियायां हरिर् । रामर् इति च स्थितौ अनेन रेफस्य विसर्गो भवति । खरि परे इत्यस्य तूदाहरणम् रामः पठति । हरिः पठिष्यति । घटः सुशोभते इत्यादीनि वोध्यानि ।

अभ्यासः

प्रश्नाः

१. सन्धिं कुरुत- तत्+ज्ञालम्; तत्+शरीरम , पुष्पात् + पटपदः, कृष्णस +टीकते, युष्मत् + उपपदे, सम्यक् +वदति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. सन्धि-विच्छेदं कुरुत -

मां प्रणमति, त्वां पश्यति अस्मच्छक्तिः, तच्छोभा, एतच्छान्तम्, रामः सज्जनः, मोहनः देवदत्तः ।

३. रेखाङ्कितपदानि सम्बद्धसूत्रेषु मेलयत

क. रामश्चिनोति पुष्पाणि हरिश्शेते महोदधौ ।	क मोऽनुस्वारः ।
ख. तट्टीका मेऽति रोचते ।	ख. झलां जशोऽन्ते ।
ग. वागीशं बन्दते सदा ।	ग. स्तोः श्चुना श्चुः ।
घ. हरिं वन्दे शिवं वन्दे वन्दे देवं चतुर्भुजम् ।	घ. ष्टुना ष्टुः ।
ङ. पाठकः सर्वदा भवेः ।	ङ खरवसानयोर्विसर्जनीयः।

४. निम्नप्रयोगान् साधयत

रामश्शेते, रामष्षष्ठः, वागीशः, हरिं वन्दे, तच्छिवः, घटः सुशोभते ।

५. स्तोः श्चुना श्चुः इति सूत्रस्यार्थं लिखत

=०=

विसर्गसन्धिः

१. विसर्जनीयस्य सः (८।३।३४)

अत्र पूर्वसूत्रात् "खरि" (खर्) इत्येवानुवर्त्तते तेन विसर्जनीयस्य सकारादेशः स्यात् खरि इत्यर्थः । विष्णुस्त्राता अत्र विष्णुः+त्राता इति स्थितौ विष्णुघटकविसर्जनीयस्य स्थाने सकारे सिद्धं भवति रूपम् । एवं फलैस्तृप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृप्तिस्तत्र । विसर्गस्य अजाश्रयत्वात् व्यञ्जनतुल्यत्वमिति अर्धमात्रस्य तस्य स्थानेऽर्धमात्रः सकारः ।

स्वादिसन्धिः

१. अतो रोरप्लुतादप्लुते (६।१।११३)

चतुष्पदं सूत्रम् । "ऋत उत् " इत्यस्मात् उदिति, "एङः पदन्तादति" इत्यतश्च अति इत्यनुवर्त्तते अप्लुतादतः परस्य रोरुः स्यात् अप्लुतेऽति इत्यर्थः । शिवोऽर्च्यः । अत्र शिवस्+अर्च्य इति स्थितौ 'ससजुषो रुः' इति सस्य रुत्वे शिवर् +अर्च्य इति जाते यत्वं प्रबाध्य अनेन अप्लुतादतः परस्य रु इत्यस्य उकारे शिव+उ+अर्च्य इति जाते 'आद् गुणः' इति पूर्वपरयोः गुणे शिवो +अर्च्य इति जाते एङ पदान्तादति इति पूर्वरूपे सिद्धं रूपम् । एवं रामोऽस्ति, पुत्रोऽयमित्याद्यपि बोध्यम् ।

२. हशि च (६।१।११४)

'ऋत उत्' इत्यस्मात् उदिति 'अतो रो' रित्यतश्च अप्लुतादतः इति चानुवर्त्तते । तेन-अप्लुतादतः परस्य रोरुः स्याद् हशि इत्यर्थः । शिवो वन्द्यः । अत्र शिवस्+वन्द्यः इति स्थितौ सकारस्य रुत्वेऽनेन उत्वे गुणे च सिद्धं रूपम् । एवं रामो हसति, घटो भवति, घटो नष्ट इत्यादीनि रूपाणि बोध्यानि ।

एवम् १ अच्सन्धिः । २ हल्सन्धिः ३. विसर्गसन्धिः ४. स्वादिसन्धिश्चेति सामान्यतया चत्वारः सन्धयः । पञ्चसन्धित्वप्रवादस्तु प्रकृतिभावस्यापि सन्धित्वं स्वीकृतम् । उत्सर्गसमानदेशा अपवादा इति न्यायात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासः

प्रश्नाः

१. सन्धिविच्छेदं कुरुत

कृष्णस्तृप्तः । मोहनस्तरुणः । उत्साहोऽत्रजातः । सुन्दरोऽभूत् । व्यासो वन्दितः।

२. शिवोऽर्च्यः, घटो भवति, इति प्रयोगौ साधयत।

३. पञ्चानां सन्धीनां प्रत्येकमुदाहरणद्वयं देयम् ।

४. कस्य सूत्रस्य किं निमित्तम् ? मेलयत

क. विसर्जनीयस्य सः ।	क. हशि ।
ख. हशि च ।	ख. खरि ।
ग. अतोरोरप्लुतादप्लुते ।	ग. खरवसानयोः ।
घ. मोऽनुस्वारः ।	घ. अप्लुतेऽति ।

तृतीयपाठः

लिङ्गवचनबोधः

१. लिङ्गबोधः

वैयाकरणाः खलु प्रायेण प्रत्ययेभ्यो लिङ्गवोधं कुर्वन्ति । न च सर्वत्र प्रत्ययाश्रय एव.लिङ्गव्रोधो भवति किन्तु लोकाश्रयश्चापि । नदी, कुमारी, स्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मतिः, ईहा, श्वश्रूरित्यादिषु प्रत्ययेभ्यो लिङ्गबोधः । अवीः तन्त्रीः,तरीः लक्ष्मीरित्यादिषु तु लोकतः ।

संस्कृते एकस्यैव पदार्थस्य कृते त्रिष्वपि लिङ्गेषु शब्दाः प्रयुज्यन्ते । यथा- तटरूपार्थबोधनाय तटस्तटी तटमिति । एवम् युद्धरूपार्थबोधाय सङ्गरः, युद्धम्, आजिरिति । एवमेव स्त्रीरूपार्थं वक्तुं परिग्रहः, दाराः, भार्या, कलत्रम् इति च । एवं लिङ्गं दुर्ज्ञेयमपि काव्यतः कोशतो लिङ्गानुशासनतो व्यवहारतश्च विज्ञेयं तत् ।

तच्च प्राकृतगुणगतावस्थात्मको धर्मः । तच्च त्रिविधम्-पुं-स्त्रीनपुंसकभेदात् । जनकः, पुत्रः, अग्रजः , । जननी, पुत्री अग्रजा । ज्ञानम् फलम्, कलत्रम् रत्नम् इत्यादीनि क्रमश उदाहरणानि ।

शब्दानां लिङ्गज्ञानाय इदं स्थूलं नियमजातमवधेयम् ।

पुँल्लिङ्गशब्दाः

१. लिङ्गभयभगशब्दान् विहाय घञन्ताः, अवन्ताः, घान्ताः, अजन्ताश्च शब्दाः पुंल्लिङ्गा भवति । यथा रामः पाकः, त्यागः, भागः, भावः, करः, गरः, विस्तरः,गोचरः, चयः, जयः इत्येवमादयः ।

लिङ्गभयभगशब्दास्तु नपुंसके भवन्ति

२: इषुधिशब्दं वर्जयित्वा किप्रत्ययान्ताः पुल्लिङ्गाः । यथा- निधिः, विधि, आधिः, उदधिः, वारिधिः, सन्धिरित्येवमादयः । इषुधिशब्दस्तु स्त्रियामपि ।

३. याच्ञाशब्दं त्यक्त्वा नङ्प्रत्ययान्ताः पुंल्लिङ्गा भवन्ति । यथा - यज्ञः, यत्नः, प्रयत्नः प्रश्नः, स्वप्न इत्येवमादयः । याच्ञा तु स्त्रियाम् ।

४ धेनुश्मश्र्वादीन् त्यक्त्वा उकारान्तशब्दाश्च पुंल्लिङ्गाः-गुरुः इक्षुः, विभुः, प्रभुः विधुः, वायुः इत्येवमादयः । धेन्वादयस्तु स्त्रियाम । श्मश्र्वादयो नपुंसके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. नान्ताः प्रायेण पुंल्लिङ्गाः भवन्ति-राजा, आत्मा, तक्षा, यज्वा, महिमा, गरिमा, लघिमा, तरुणिमा, अरुणिमा इत्येवमादयः ।

६. ऋतु- मास-रस-वर्णवाचकाश्च शब्दाः पुंल्लिङ्गा भवन्ति । यथा-वसन्तः, ग्रीष्मः, हेमन्तः, । शरद्वर्षाशब्दौ तु स्त्रीलिङ्गौ । वैशाखः ज्येष्ठः, आषाढः, श्रावणः, भाद्र. इत्येवमादयः । मधुरः, अम्लः, कषायः, तिक्तः, लवणः,कटुरिति वर्णवाचकाश्च शुक्लः, कृष्ण, पीतः, रक्त इत्येवमादयः क्रमेणोदाहरणानि बोध्यानि ।

स्त्रीलिङ्गाः

१. क्तिन्-(ति) प्रत्ययान्ताः स्त्रीलिङ्गाश्शब्दा भवन्ति- मतिः, गतिः, कृतिः स्तुतिः, भूतिः, सम्पत्तिरित्येवमादयः ।

२. एकाक्षरा ईकारान्ता अनेकाक्षरा इकारान्ताश्च प्रायेण स्त्रीलिङ्गे भवन्ति- श्रीः, धीः, ह्रीः नदी लक्ष्मीः, गौरी, देवी, भगवती इत्येवमादयः ।

३. तल्प्रत्ययान्ताः- जनता, जडता, कृशता इत्यादयः, धातृ पितृ कर्त्रादिशब्दान् त्यक्त्वा मातृ-दुहितृ-स्वसृ यातृ ननान्दृप्रभृतय ऋकारान्ताश्च स्त्रियाम् ।

४. आबन्ता ऊङन्ताश्च स्त्रीलिङ्गाः- अजा, विद्या, शोभा, सीमा, दामा, कारीषगन्ध्या, कुरूः, श्वश्रूरित्येवमादयः ।

५. समाहारद्विगुसमासेन निष्पन्नाः शब्दाः स्त्रीलिङ्गाः - त्रिलोकी, पञ्चवटी, द्विपुरी, पञ्चाक्षरी इत्येवमादयः ।

६. विंशतिशब्दतो नवतिशब्दपर्यन्ताः संख्यावाचकाश्शब्दाश्च । एवं तिथिवाचकाश्च शब्दाः स्त्रीलिङ्गा भवन्ति- प्रतिपद्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी इत्येवमादयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नपुंसकलिङ्गाः

भावल्युट् (अन) प्रत्ययान्ताः भावक्तान्ताश्च नपुंसके भंवन्ति- गमनम्, शयनम्, हसनम् दर्शनम्, पठनम्, हसितम्, गीतम्, जीवितमित्यादयः।

भावकृत्यप्रत्ययान्ताः क्यबन्ताश्च- भवितव्यम्, एधनीयम्, भाव्यमित्यादयः। दृश्यम्, नृत्यम् इत्यादयश्च।

तद्धितेषु त्वष्यञ्प्रत्ययान्ताश्च नपुंसके भवन्ति-शुक्लत्वम्, शौक्ल्यम्, न्दरत्वम्, सौन्दर्यम्, मधुरत्वम्, माधुर्यम्, राजत्वम्, राज्यम्, शूरत्वम्, शौर्यम्, रत्वम्, क्रौर्यम् इत्यादयः।

क्रियाविशेषणानि, अव्ययविशेषणानि च नपुंसके- साधु वदति, शीघ्रं च्छति, मन्दं धावति, मनोहरं प्रातः, दुःखदं सायम्।

समाहारद्वन्द्वा अव्ययीभावसमासाश्च- पाणिपादम्, हस्त्यश्वम्, प्रतिदिनम्, यथाशक्ति यथामति इत्यादयः।

वचनम्

"सुप्तिङन्तं पदमिति पाणिनीयसूत्रानुसारेण पदं द्विविधम् -सुवन्तं ङन्तञ्च। सुवन्तमित्यत्र तिङन्तमित्यत्र च सुप्तिङौ प्रत्ययौ। सुपस्तिङश्च भक्तय उच्यन्ते। संस्कृते प्रातिपदिकेभ्यः सुब्विभक्तयो धातुभ्यश्च तिङ्विभक्तयो वन्ति। तत्र प्रथमादिभेदेन सप्तविधाः सुपः। सु, औ, जस् इति प्रथमा।अम्, औट् शस्, इति द्वितीया। टा, भ्याम्, भिस्, इति तृतीया। ङे, भ्याम्, भ्यस् इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थी । ङसि, भ्याम्, भ्यस् इति पञ्चमी । ङस्, ओस्, आम् इति षष्ठी । ङि, ओस्, सुप् इति सप्तमी। सु,औ जस एव, सम्बोधनानि । तिङ्विभक्तयश्च पूर्वं द्विधा आत्मनेपदम्, परस्मैपदञ्चेति । तत्र प्रत्येकमपि त्रिविधम्- प्रथममध्यमोत्तमभेदात् । परस्मैपदे तिप्, तस्, झि इति प्रथमपुरुषः । सिप्, थस्, थ इति मध्यमपुरुषः । मिप् , वस, मस्, इति उत्तमपुरुषः। आत्मनेपदे च त, आताम्, झ इति प्रथमपुरुषः, थास्, आथाम्, ध्वम् इति मध्यमपुरुषः । इट्, वहि, महिङ्, इति चोत्तमपुरुषः । प्रत्येकस्मिन् पुरुषेएकवचनद्विवचनबहुवचनप्रत्यया भवन्ति, नाधुनिकभाषान्तरवत् एक-द्विवचनमात्रम् ।

एवम् संस्कृते एकवचनम्, द्विवचनम्, बहुवचनम् इति त्रीणि वचनानि भवन्ति । यथा सु, औ, जस्, तिप्, तस्, झि, इत्यादि सुबन्ते तिङन्ते च क्रमशः । वचनञ्च उच्यते पदार्थोऽनेनेति । एकस्य वचनम् (उक्तिः) एकवचनम् । द्वयोर्वचनम् द्विवचनम् । बहुनाम् (द्वयोरधिकानाम्) वचनं बहुवचनम् इति । एवञ्चैकस्य वस्तुनो बोधने एकवचनम्, द्वयोर्वस्तुनोर्बोधने द्विवचनम्, बहुनां वस्तुनां बोधने बहुवचनं भवतीति बोध्यम् ।

वाक्ये युष्मच्छब्दस्य प्रयोगे क्रियापदे मध्यमपुरुषस्य तिङः प्रयोगो भवति । यथा-त्वं पठसि, युवां पठथः, यूयं पठथ इति । अस्मच्छब्दस्य प्रयोगे तु अहम् पठामि , आवाम् पठावः, वयं पठामः इति । शेषे च प्रथमपुरुषस्य प्रयोगो भवति स पठति, तौ पठतः, ते पठन्ति इति । एवञ्च कर्त्तृपदानुसारेण क्रियापदेऽपि वचनप्रयोगः- एकवचन-द्विवचन-बहुवच-रुपेण । इयं प्रयोगप्रदर्शिका तालिका-

प्र. पु. स भवति ।	तौ भवतः ।	ते भवन्ति ।
म. पु. त्वम् भवसि ।	युवाम् भवथः ।	यूयं भवथ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ. पु.अहम् भवामि । आवाम् भवावः । वयम् भवामः ।

इति

आत्मनेपदे तु-

प्र.पु. बालकः शेते । बालकौ शयाते । बालकाः शेरते ।

म. पु. त्वम् शेपे । युवाम् शयाथे । यूयं शेध्वे ।

उ. पु. अहम् शये । आवाम शेवहे । वयम् शेमहे । इति ।

सुबन्तेषु अदन्तस्य पुंल्लिङ्गशब्दस्यायं प्रयोगप्रकारः-

प्र. रामः पठति ।रामौ पठतः । रामाः पठन्ति ।

द्वि. छात्रः रामम् पश्यति । छात्रः रामौ पश्यति । छात्रः रामान् पश्यति।

तृ. छात्रः रामेण गच्छति । छात्रः रामाभ्यां गच्छति । छात्रः रामैः गच्छति।

च. छात्रः रामाय ददाति । छात्रः रामाभ्यां ददाति । छात्रः रामेभ्यः ददाति ।

पं. छात्रः रामाद् भिन्नोऽस्ति । छात्रः रामाभ्याम् भिन्नोऽस्ति । छात्रः रामेभ्य भिन्नोऽस्ति ।

प. रामस्य पुस्तकम् । रामयोः पुस्तकम् । रामाणां पुस्तकम्।

स. रामे भक्तिः । रामयोः भक्ति । रामेपु भक्तिः ।

अभ्यासः

प्रश्नाः

१. लिङ्गस्य किं लक्षणम् ? कतिविधञ्च तत् ?

२. अभ्यास-पाठ-राग-प्रगति-नीति-स्थितिशव्दाः किंलिङ्गकाः ?

३. अशन-वसन-शयन-भवनशब्दाः किंलिङ्का ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. वचनानि कति ? सुबन्तानां तिङन्तानाञ्च उदाहरणानि लिखत ।

५. परस्परं मेलयत

क.प्रथमा ।	क.	ङस्, ओस, आम् ।
ख. द्वितीया ।	ख.	टा, भ्याम् ,भिस् ।
ग. तृतीया ।	ग.	सु, औ, जस् ।
घ. चतुर्थी ।	घ.	अम्, औट्,शस् ।
ङ. पञ्चमी ।	ङ.	ङे, भ्याम्, भ्यस् ।
च. षष्ठी ।	च.	ङि, ओस्, सुप् ।
छ. सप्तमी ।	छ.	ङसि, भ्याम्, भ्यस् ।

६. परस्परं मेलयत

क. रामः	क. पठामि ।
ख. त्वम्	ख. पठन्ति ।
ग. युवाम्	ग. पठसि ।
घ रामौ	घ. पठथः ।
ङ अहम	ङ पठामः ।
च. वयम्	च. पठतः ।
छ. ते	छ. पठति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थपाठः

कारकं तत्परिचयश्च

"स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् "(४।१।२)

इत्यनेन सूत्रेण ङ्याबन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्यया विधीयन्ते । तेपामर्थविशेपान् व्यवस्थापयितुमिदं कारकप्रकरणम् ।

कारकपरिचयः

संस्कृतव्याकरणे कारकं महत्त्वपूर्णं विपयवस्तु । भापिकदृष्ट्या दार्शनिकदृष्टया च कारकाणां महत्तरं स्थानमस्ति । तत्परिचयार्थं पाणिनीयव्याकरणाधारेण विचार्यते -

कारकशब्दः करोतीति विग्रहे कर्त्तरि ण्वुलि अकादेशे सिद्धं भवति । एवमस्य "कर्त्ता" इत्यर्थः प्रतीयते , परमेतन्मात्रेणार्थेन व्याकरणे कार्यं न चलति । अतोऽस्य कश्चन विशिष्टोऽर्थः स्वीकर्त्तव्यः । स च क्रियानिष्पादकत्वरूपः, साक्षात् क्रियाजनकत्वरूपो वा । अयञ्चार्थः कारकशब्दस्य अन्वर्थ-(विशेपार्थानुसारि)-तया निःसरति । लध्वक्षरायां संज्ञायां कर्त्तव्यायां "कारकम्" इति महत्त्याः संज्ञायाः करणेन अन्वर्थता विज्ञायते । अतः यत् साधनम् निर्वर्त्तनं करोति तत् कारकं भवति[1] ।

तच्च कारकं पड्विधं भवति। कर्त्तृकर्मकरणसम्प्रदानापादानाधिकरणभेदात् । इदं प्रत्येकमपि क्रियायाः निष्पादनं करोति । तेनैव स्वेन स्वेन क्रियानिष्पादकत्वव्यापारेण परस्परं भिन्नेन भिद्यते प्रत्येकम् । प्रत्येकं कारकस्य क्रियानिष्पादकत्वमेवं बोध्यम्-

---

१. संज्ञा शब्दश्य सर्वनामशब्दस्यच यया अवस्थया क्रियायाः सबन्धो ज्ञायते सा अवस्था कारकम्"हिन्दी सञ्जीवनी"पं श्रीकृष्णः शुक्लः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्च कारकं षड्विधं भवति। कर्त्तृकर्मकरणसम्प्रदानापादानाधिकरणभेदात् । इद प्रत्येकमपि क्रियाया: निष्पादनं करोति । तेनैव स्वेन स्वेन क्रियानिष्पादकत्वव्यापारेण परस्परं भिन्नेन भिद्यते प्रत्येकम् । प्रत्येकं कारकस्य क्रियानिष्पादकत्वमेवं बोध्यम्-

१. कर्त्तुः कारकत्वम्

रामः पठतीत्यादौ कर्त्तू रामस्य कारकान्तरप्रवर्त्तनं (प्रेरणं) व्यापारः। यतो हि सर्वं कर्मादिकं कर्त्रधीनम् । एवमस्य कर्त्तृकारकत्वम् ।

२. कर्मणः कारकत्वम्

भक्तो हरिं भजति इत्यादौ कर्मणो हर्यादेः भजनादिक्रियाफलोद्देश्यभवनं व्यापारः इति तज्जनकत्वात्तन्निष्पादकत्वाद्वा कर्मणः कारकत्वम् । देवदत्त ओदनं पचतीत्यादौ कर्मण ओदनादेर्विक्लित्यादिफलाश्रयभवनं व्यापार इति तस्य कारकत्वम् ।

३. करणस्य कारकत्वम्

रामो नेत्राभ्यां पश्यति इत्यादौ करणरूपनेत्रयोरव्यवहितफलजनकत्वं व्यापार इति तस्य कारकत्वम् ।

४. सम्प्रदानस्य कारकत्वम्

राजा विप्राय गां ददाति इत्यादौ सम्प्रदानस्य विप्रस्य प्रेरणारूपो व्यापार इति तन्निष्पादकत्वात् सम्प्रदानस्य कारकत्वम् । यतो हि गोदानकर्मणि राजानं प्रेरयति विप्रः आचार्यत्वात् पुरोहितत्वाद्वा ।

५. अपादानस्य कारकत्वम्

बृक्षात् पर्णं पतति इत्यादौ बृक्षरूपस्य अपादानस्य अवधिभवनं व्यापारः । पृथग्भवनेऽवधिभवनव्यापार-(क्रिया)-निष्पादकत्वेन अपादानस्य कारकत्वम् ।

६. अधिकरणस्य कारकत्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवदत्त: कटे आस्ते, स्थाल्यामोदनं पचति इत्यादौ कटरूपाद्यधिकरणस्य कर्तृकर्मव्यवहितक्रियाधारणं व्यापार इति कटस्थाल्याद्यधिकरणस्य कारकत्वम् । एवं व्यापारभेदात्तु कारकभेद: ।

सम्वन्धस्तु न कारकम् रामस्य पुस्तकमस्ति इत्यादौ रामादे: षष्ठ्यन्तस्य पुस्तकादिसम्वन्धेन सत्तारूपक्रियानिष्पादकत्वाभावात्, तदन्वयाभावाद्वा, सम्बोधनमपि न कारकम् हे राजन् सार्वभौमो भव इत्यादौ भवनक्रियया सार्वभौमस्यान्वयो (योगो) न तु राजन् इत्यादिसम्वोधनस्येति वस्तुस्थिति: ।

प्रथमादय: सप्तत्रिका: सुब्विभक्तय: । तत्र उक्ते कर्त्तरि कर्मणि च प्रथमा भवति । अनुक्ते कर्मणि द्वितीया । अनुक्ते कर्त्तरि करणे च तृतीया । अनुक्ते सम्प्रदाने चतुर्थी । अपादाने पञ्चमी । कारकप्रातिपदिकार्थव्यतिरिक्ते स्वस्वामिभावसम्बन्धे षष्ठी । अनुक्तेऽधिकरणे सप्तमी विभक्तिर्भवति इति वस्तुस्थिति: । तत्तदर्थप्रतिपादकानि इमानि प्रमुखाणि सूत्राणि, तद्व्याख्यानम् उदाहरणानि च–

१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२।३।४६)

द्विपदं सूत्रम् । प्रथमं सप्तम्यन्तं समस्तं पदम् । तत्र समासश्च पदं पदं प्रति प्रतिपदम्, प्रतिपदं भवं प्रातिपदिकम्, प्रातिपदिकस्यार्थ: प्रातिपदिकार्थ:, प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति विग्रहे इतरेतरद्वन्द्वे कृते प्रातिपदिकार्थलिङ्गपरिमाणवचनानि इति । तान्येवेति विग्रहे मात्रचि मयूरव्यंसकादिसमासे सिद्ध्यति । अत्र समासावयवेषु प्रत्येकेषु मात्रशब्दस्य सम्वन्ध: । तेनायं सूत्रार्थ:- प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे च प्रथमा स्यादिति । प्रातिपदिकार्थश्चात्र यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमेनोपस्थितिः सः । शक्यार्थः प्रातिपदिकार्थं इति यावत् । अस्योदाहरणानि उच्चैः, नीचैः कृष्णः, श्रीः, ज्ञानमित्यादीनि । अत्र प्रत्येकमपि शक्यार्थरूपस्य प्रातिपदिकार्थस्य प्रतीयमानत्वात् तत्र प्रथमाविभक्तिरनेन भवति ।

लिङ्गमात्रस्य - तटः तटी: तटम् । परिमाणमात्रे- द्रोणो ब्रीहिः । आढकम् धान्यम् । वचनमत्र संख्या- एकः, द्वौ, वहवः । शक्यार्थमादाय प्रथमाया उत्पत्तौ पदान्तरसम्बन्धे सति लक्ष्यार्थवोधो भवतीति, सिंहो माणवकः इत्यादौ सिंहादेः प्रातिपदिकार्थस्य सत्त्वेन प्रथमा भवति । अन्यथा सिंहशब्दस्य सिंहसदृशार्थतया नियतोपस्थितिकत्वाभावेन प्रातिपदिकार्थत्वन्न स्यात् ।

२. कर्त्तुरीप्सिततमं कर्म (१।४।४९)

" कारके " इत्यधिकारसूत्रमष्टाध्याय्याम् । विभक्तिं परिवर्त्य कारकम् इत्यधिकृतमत्र । तेन कर्त्तुः क्रियया प्राप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् इत्यर्थः । अनेन भक्तो हरिं भजति इत्यादौ हर्यादेः कर्मसंज्ञायां कृतायाम्-

३. कर्मणि द्वितीया (२।३।२)

अनभिहिते इत्यस्याधिकारः । अनभिहिते इत्यस्य च अनुक्ते इत्यर्थः । तेन अनुक्ते कर्मणि द्वितीया स्यात् इत्यर्थः । भक्तो हरिं भजति । शिष्यो गुरुं प्रणमति ।

कर्त्तृकर्मभावेषु यत्रार्थे प्रत्ययो भवति सोऽर्थ उक्तो भवति, यत्र चार्थे न भवति तिवादिप्रत्ययः स अनुक्त इति भक्तो हरिं भजति इत्यादौ भज्धातोः कर्त्तरि तिप्प्रत्ययविधानात् स उक्तः, कर्मणि प्रत्ययस्याभावात् तत् अनुक्तमिति कर्मणि अनेन द्वितीया भवति । तत्रापि एकस्योक्तौ एकवचनमेवेति हरिं भजति इति भवति । भज्यते इत्यादौ च प्रथमैव । तदर्थानामुक्तिश्च तिङ्कृत्तद्धितसमासनिपातैर्भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं कर्म त्रिविधम् निर्वर्त्यविकार्यप्राप्यभेदात् । कुम्भकारः घटं करोति । स्वर्णकारः सुवर्णं कुण्डलं करोति । बालकः घटं पश्यति इत्यादीनि क्रमेणोदाहरणानि ।

४. स्वतन्त्रः कर्त्ता (१।४।५४)

स्वातन्त्र्यमत्र प्रधानीभूतधात्वर्थव्यापाराश्रयत्वम् । " कारके " इत्यस्याधिकारो वर्त्तत एव । तेन क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् इत्यर्थः ।

५. साधकतमं करणम् (१।४।४२)

तमबर्थः प्रकर्षः । क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात् इत्यर्थः । आभ्यां कर्त्तृकरणसंज्ञायां कृतायाम्

६. कर्त्तृकरणयोस्तृतीया (२।३।२८)

कर्त्ता च करणञ्च कर्तृकरणे तयोः । अनभिहिताधिकारोऽस्त्येवेत्ययमर्थः अनुक्ते कर्त्तरि करणे च तृतीया स्यात् इति । रामेण वाणेन हतो बाली । मया कलमेन लिखितानि अक्षराणि । अत्र हननलेखनक्रियायां स्वातन्त्र्यात् रामरूपात् मद्रूपाच्च कर्त्तुस्तृतीया । तत्रैव क्रियायां साधकतमत्वेन वाणादपि कलमादपि तृतीया भवति । एवमन्यत्रापि ।

अनुक्ते इत्युक्त्या हरिः श्लोकं पठति इत्यादौ हर्यादिशव्दान्न तृतीया तिङा कर्तुरुक्तत्वात् कर्त्तरि तिङ्विधानादत्र ।

हरिः जीवनो भक्तानामित्यत्रापि हरिशव्दान्न तृतीया, जीव्यतेऽनेनेति विग्रहे करणे विहितेन ल्युटा तदुक्तेः । एवं हरिः शाव्दिकः, हरिः कृतविश्व इत्यादावपि हर्यादिशव्दान्न तृतीया, ठका समासेन च कर्त्तुरुक्तेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७. कर्मणा यमभिप्रैति स सम्प्रदानम् (१।४।३२)

पञ्चपदं सूत्रम् । कारके इत्यस्याधिकारः । सम्प्रदानमिति महासंज्ञाकरणात् अन्वर्थता विज्ञायते सम्प्रदीयतेऽस्मै तत् सम्प्रदानमिति । तेन च दानक्रियाकर्मणेति लभ्यते । अतः दानक्रियाकर्मणा कर्त्ता यं सम्बन्धुमिच्छति तत् कारकं सम्प्रदानसंज्ञकं स्यात् इति दानञ्च स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम् । एवञ्च विप्राय गां ददाति इत्यादौ दानक्रियाकर्मणा गवा विप्रःसम्बन्धुमीप्सितो राज्ञा इति तस्य सम्प्रदानसंज्ञायां कृतायाम् -

८. चतुर्थी सम्प्रदाने (२।३।१३)

अनभिहिते इत्यस्याधिकारो वर्त्तत एव । अतः अनभिहिते सम्प्रदाने चतुर्थी स्यात् इत्यर्थः, अनेन सम्प्रदानाद् विप्रशब्दाच्चतुर्थी भवति । तत्राप्येकवचनविवक्षायामेकवचनमिति सामान्यम् । एवं वराय कन्यां ददाति इत्याद्यपि ।

अनभिहिते इत्युक्त्या दानीयो विप्रः इत्यादौ विप्रादिशब्दान्न चतुर्थी। अनीयरा प्रत्ययेन तत्र सम्प्रदानस्योक्तेः । तत्र हि दीयतेऽस्मै इति विग्रहे बाहुलकात् सम्प्रदाने स भवति । त्रिविधं सम्प्रदानं भवति अनिराकर्त्तृ प्रेरयितृनुमन्तृभेदात । सूर्याय अर्घ्यं ददाति इति प्रथमस्योदाहरणम् । द्वितीयमुक्तम् । तृतीयन्तु उपाध्यायाय गां ददाति इत्यादि ।

९. ध्रुवमपायेऽपादानम् (१।४।२४)

अपाये ध्रुवम् अपादानमित्यन्वयः । कारके इत्यस्त्येव । अपायो विभागः । ध्रुवञ्च न स्थिरमात्रं किन्तु अवधिभूतं स्थिरमस्थिरं वा । तेन विभागे साध्ये अवधिभूतं कारकम् अपादानं स्यात् इत्यर्थः । अनेनापादानसंज्ञायाम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०. अपादाने पञ्चमी (२।३।२८)

अत्रापि कारके इति वर्त्तत एव । अपादाने कारके पञ्चमी स्यात् । ग्रामादायाति । पर्वतादवरोहति । धावतोऽश्वात्पतति । बलाहकाद् विद्योतते विद्युत् । कस्मात् त्वम् ? नद्याः । पापात् जुगुप्सते । अधर्माद् विरमति इत्यादीन्युदाहरणानि।

११. आधारोऽधिकरणम् (१।४।४५)

आध्रियन्ते पदार्था अस्मिन् इत्याधारः । स च आधारोऽत्र कस्य इत्याकाङ्क्षायां कारकाधिकारात् क्रियाया इति लभ्यते । इयञ्च संज्ञा साक्षात् क्रियाधारयोर्न सम्भवति, पराभ्यां कर्त्तृकर्मसंज्ञाभ्यां बाधात्, किन्तु कर्त्तृकर्मद्वारा । अतोऽयं सूत्रार्थः- कर्त्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् । इत्याधिकरणसंज्ञायाम्-

१२. सप्तम्यधिकरणे च (२।३।३६)

अनभिहिते इति कारके इति चाधिकृतम् । अनभिहितेऽधिकरणकारके सप्तमी स्यात् इत्यर्थः । औपश्लेपिकवैषयिकाभिव्यापकभेदात् आधारस्त्रिविधः। तत्राद्यः- कटे आस्ते । अत्रदेवदत्तादिकर्त्तृद्वाराकटस्य उपवेशनक्रियासम्वन्धादाधारतयाऽधिकरणत्वेऽनेन सप्तमी । स्थाल्यां पचति। अत्र ओदनादिकर्मद्वारा स्थाल्याः पाकक्रियासम्बन्धादाधारतयाऽधिकरणत्वे सप्तमी । द्वितीय :- मोक्षे इच्छाऽस्ति । अत्र मोक्षस्य विपयतासम्वन्धेन इच्छाधारत्वात् अधिकरणत्वेन सप्तमी तस्माच्छव्दात् । अभिव्यापकः सर्वस्मिन् आत्मास्ति । अत्र आत्मद्वारा सत्ताधारत्वात् सर्वशव्दस्याधिकरणतायां सप्तमी तस्मात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३. षष्ठी शेषे (२।३।५०)

कर्मादयः प्रातिपदिकार्थपयन्ता उपरि उक्तास्तत्र द्वितीयादीनां विधानात् । अतोऽत्रापि उक्तादन्यः शेषः । अयमर्थः कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावसम्बन्धः शेषस्तत्र षष्ठी स्यात् इति राज्ञः पुरुषः । अत्र स्वस्वामिभावसम्बन्धेऽनेन षष्ठी भवति राजन्शब्दात् । अत्र स्वपदेन पुरुषः स्वामिपदेन च राजा गृह्यते । एवम् रामस्य पुस्तकम् । तस्य गृहमित्याद्यपि बोध्यम् । जन्यजनकभावसम्बन्धे तु पितुः पुत्रः, पुत्रस्य पुत्र इत्यादि ।

अभ्यासः

प्रश्नाः

१. कारकस्य किं लक्षणम् ? कतिविधञ्च तत् ? कानिच तानि ?

२. कर्तृकारकस्य सम्प्रदानस्य कीदृशो व्यापारः

३. प्रथमातृतीये कुत्र कुत्र भवतः ?

४. रामेण वाणेन हतो वाली इत्यत्र केन कथं तृतीया ?

५. कर्मणा यमभिप्रैति .... ध्रुवमपायेऽपादानम् इत्यनयोरर्थं लिखत।

६. कुत्र प्रयोगे किं सूत्रं प्रवर्त्तते मेलयत

क. हरिं भजति	क. अपादाने पञ्चमी ।
ख. कलमेन लिखति	ख. चतुर्थी सम्प्रदाने ।
ग. ब्राह्मणाय दक्षिणां ददाति	ग. सप्तम्यधिकरणे च ।
घ. बालकस्य पुस्तकम्	घ. कर्त्तुरीप्सिततमं कर्म ।
ङ. सभायामुपस्थितः	ङ षष्ठी शेषे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च. विद्यालयादायाति च. कर्त्तृकरणयोस्तृतीया ।

७. कस्या विभक्तेर्विधाने का संज्ञा आवश्यकी ? योजयत

क. चतुर्थी – कर्त्तृकरणसंज्ञे ।

ख. तृतीया – कर्मसंज्ञा ।

ग. द्वितीया – सम्प्रदानसंज्ञा

घ. पञ्चमी – अधिकरणसंज्ञा

ङ. सप्तमी – अपादानसंज्ञा

=o=

पञ्चमपाठः

अव्ययलक्षणम्, उपसर्गाणां प्रयोगव्यापारश्च

सामान्यतः पदं द्विविधम्- सुबन्तम् तिङन्तञ्च । तत्र सुबन्तं द्विविधम्- सव्ययम अव्ययञ्च । तत्र सव्ययानि (विकारिणः) घटपटादीनि लिङ्गविभक्तिवचनैरनेकरूपताङ्गतानि पदानि । अव्ययानि च लिङ्गविभक्तिवचनाननुसारीणि एकरूपाणि स्वरादिनिपातोपसर्गरूपाणि पदानि । अव्ययान्यपि पदान्येव । तेपामपि प्रातिपदिकत्वेन स्वाद्युत्पत्तेः । समुत्पन्नानां स्वादीनान्तु लुग भवति । विभक्त्यानयनं पदत्वार्थम् । तेन तेपां प्रयोगार्हता भवति । अन्यथा अपदं न प्रयुञ्जीतेति नियमविरोधः स्यात् । इदमतिप्रसिद्धमव्ययलक्षणम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ इति[1]

अव्ययानामव्ययत्वं हि लिङ्गप्रतिपादने सामर्थ्याभावात् कारकप्रतिपादने सामर्थ्याभावात् , संख्याविशेषप्रतिपादने सामर्थ्याभावाच्च ।

संस्कृतव्याकरणे विकीर्णाश्चाव्ययशब्दा भाषिकीं महत्तां विशिष्टतां समृद्धिञ्चादधाना: पञ्चविधा: प्राप्यन्ते-

१. क्रियाविशेषणानि

शनै: , शीघ्रम्, नूनम, कदाचित्, वृथा, किमर्थमित्यादीनि।

२ सम्बन्धवाचकानि

अध:, उच्चै:, नीचै:, सदृशम्, सह, सार्धम्, समम्, इवेत्यादीनि

३. समुच्चयबोधकानि

इमानि द्विप्रकारकाणि संयोजकानि, विभाजकानि च । तथा, एवम्, च अपि इत्यादीनि संयोजकानि अथवा, अन्यथा, किन्तु, परन्तु, किञ्च, किंवा इत्यादीनि विभाजकानि ।

४. विस्मयादिबोधकानि

हा, अहो, वत, आश्चर्यम्, साधु-साधु इत्यादीनि ।

१.'श्रुतिश्चेयमाथर्वणी प्रणवविद्यायाम्' इति प्रक्रियाप्रकाशे शेषकृष्ण: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसर्गाः

उपसर्गा अपि अव्ययाः । तेषां निपातत्वेनाव्ययसंज्ञायामागतानां स्वादीनाम् "अव्ययादाप्सुपः (२।४।८२)" इत्यनेन लुग् भवति । शब्दराशिवर्धकत्वेन एकस्यापि धात्वर्थस्य विविधीकरणेन, भाषिकस्य सौष्ठवस्य सम्वर्धकत्वेन च महत्वपूर्णमपरिहार्यं स्थानमुपसर्गाणम् ।

उपसर्गत्वञ्च पाणिनिसङ्केतसम्बन्धेनोपसर्गपदवत्वम्[1]। एते च क्वचन क्रियाक्षेपकाः क्वचन क्रियाविशेषकाः, क्वचन च क्रियान्तरद्योतकाः। तत्र प्रादेशं विलिखति इत्यादौ विमानादिक्रियाक्षेपकाः । प्रकरोति इत्यादौ क्रियाविशेषकाः, अनुभवति इत्यादौ च क्रियान्तरद्योतकाः । ते च- प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अति, अपि, सु, उद्, अभि, प्रति, परि, उप इति द्वाविंशतिः (२२) उद्दिष्टाः पाणिनिना । इमे च ते प्राग्धातोः इति सूत्रानुसारेण धातोः प्राक् प्रयुज्यन्ते लोके । उपसर्गाणां क्रियान्तरद्योतकत्वादेव प्रभवति, पराभवति, संभवति, अभिभवति, उद्भवति, परिभवति इत्यादौ सत्तार्थकस्यापि तत्तदुपसर्गसहितस्य भूधातोर्विभिन्नानामर्थानां प्रतीतिर्भवति । एवं हरणार्थकस्यापि विभिन्नोपसर्गसहितस्य च हृधातोरनेकेऽर्थाः प्रतीयन्ते प्रहरति, आहरति , संहरति, विहरति, परिहरतीति । तदुक्तम्-

---

१.जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वे सति प्राद्यन्यतमत्वम् च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ।

उक्तं क्रियाक्षेपकत्वादिकं प्रादीनां प्रयोगव्यापारनिदर्शनञ्चेत्थं द्रष्टुं शक्यते-प्र+पद् ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाभ्यहम् , अत्र पद्यतेः शरणीकरणम प्रोपसर्गबलेन ।

प्र+ भू- हिमवतो गङ्गा प्रभवति । अत्र प्रादुर्भवति इत्यर्थ :।

प्र+स्था-प्रीतः प्रतस्थे मुनिराश्रमाय । अत्र प्रोपसर्गबलेन गतिनिवृत्यर्थस्या स्थाधातोः प्रस्थानम्= गमनमर्थः सञ्जातः।

प्र+चर- यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥ अत्र--गतिभक्षणार्थकस्यापि चर्धातोः प्रचारो व्यापनं वा अर्थः सञ्जात : ।

परा+भू- दुर्बलान् पराभवति बलवान् । अत्र सत्तार्थकस्यापिभूधातोरुपसर्गबले पराभवोऽर्थः ।

परा+वृत्- मोहनः गृहात् परावर्त्तते । अत्र वर्त्तनार्थकस्यापि वृत् धातो परावृत्तिर्निवृत्तिर्वा अर्थः ।

परा+जि- अत्र जयार्थकस्यापि जिधातोः परोपसर्गबलेन पराजयोऽर्थः ।

अप+इण्- अत्र सामान्यगत्यर्थकस्य इण्धातोरपोपसर्गबलेन अपसरणं दूरीभवनं वा अर्थः- सूर्योदयेऽन्धकारोऽपैति ।

अप+कृ- अथवा सैनिकाः केचिदपकुर्युर्युधिष्ठिरम् । (महाभारते) अत्र करणार्थकस्यापि कृधातोरपोपसर्गबलेन अपकारोऽर्थः सञ्जातः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप+नी- 'अपनेष्यामि ते दर्पम्' अत्र प्रापणार्थकस्यापि णीधातोरपोपसर्गवलेन दूरीकरणं विनाशो वा अर्थः प्रतीयते ।

सम्+भू- सम्भवाभि युगे युगे । अत्र सत्तार्थकस्य भूधातोःसमुपसर्गवलेन आविर्भाव उत्पत्तिर्वा अर्थो बुध्यते ।

सम्+क्षिप्– 'संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा' । अत्र प्रेरणार्थाकस्य क्षिप्धातोः समुपसर्गवलेन संक्षेपोऽर्थः प्रतीयते ।

सम्+हृ -शङ्करः संहरति अत्र हरणार्थकस्य हृधातोः समुपसर्गबलेन संहारो नाशो वार्थः प्रतीयते । क्वचन च आकुञ्चनं परावर्त्तनं वा अर्थः समुपसृष्टस्य हृधातोर्भवति- 'न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः'। इति ।

सम्+कृ -संस्करोति भाण्डम् , अत्र समुपसृष्टस्य करणार्थकस्य कृधातोः संस्करणं मार्जनं वा अर्थः सञ्जातः ।

अनु+मन्- 'राजन्यान् स्वपुरनिवृत्तयेऽनुमेने' । अत्र अनूपसर्गसहितस्य मन्धातोरनुमतिः स्वीकृतिर्वार्थः सञ्जातः ।

अनु+इण्- सेवकः शब्दार्थमिव स्वामिनमन्वेति । अत्र इणधातोरनुगमनमर्थः।

अनु+ग्रह्- गुरो!मामनुगृहाण । अत्र ग्रहणार्थकस्य ग्रहधातोरनूपसर्गवलेन कृपाकरणं क्षमा वार्थः सञ्जातः ।

अनु+ज्ञा- अनुजानीहि मां गमनाय । अत्र अनूपसृष्टस्य ज्ञाधातोः स्वीकृतिरर्थः सम्पन्नः । आदेशादिको वार्थः प्रतीयतेऽत्र

अव+गम् छात्रोऽर्थमवगच्छति । अत्र गमनार्थकस्यापि गम्धातोरवबोधो ज्ञानं वार्थः सम्पन्न उपसर्गबलेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अव+इण्- 'अवेहि मां किङ्करमष्टमूर्त्तेः' (रघु.) । अत्र अवोपसृष्टस्येणधातोर्ज्ञानं परिचयो वार्थः सम्पन्नः ।

अव+मन्- नावमन्येत निर्धनम् । अत्र मन्धातोरवोपसर्गबलेन अवमानना तिरस्कारो वार्थः सम्पन्नः ।

अव+धा-छात्रः पठने नावधत्ते । अत्र धारणपोषणार्थकस्यापि धाधातोरवोपसर्गबलेन ध्यानम् एकाग्रता वार्थः सम्प्रतीयते ।

अव+ज्ञा- अवजानासि मां यस्मादतस्ते न भविष्यति ।

मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ (रघु.) अत्र अवबोधनार्थकस्य ज्ञाधातोस्तिरस्कारो हेलनं वार्थः सञ्जातः ।

निस्, निर्+क्रमु-सन्यासी निष्क्रामति गृहात् । अत्र पादविक्षेपमात्रार्थकस्य क्रमुधातोर्निस् इति, निर्, इति वा उपसर्गबलेन निष्क्रमणमर्थः । निर्गमनं वाऽर्थः ।

निस्, निर्+णी(नी) कलहस्य मूलं निर्णयति । अत्र निरुपसर्गबलेन नीधातो प्रापणार्थकस्यापि , निर्णयो निश्चयो निर्धारणं वाऽर्थः ।

निरा+कृ- दोषान् निराकरोति । अत्र करणार्थस्य कृधातोर्निरा इति उपसर्गद्वयबलेन मार्जनं समाधानम् अपाकरणं वार्थो जातः ।

निस्+क्रम्- इति निष्क्रान्ताः सर्वे । अत्र निर्गमनं बहिर्भवनं वा क्रमुधातोरर्थः संवृत्तः ।

दुस् ,दुर् +जीव्- निर्धनो दुर्जीवति । अत्र दुःखेन जीवनं जीव्धातोरर्थः । अपठितानां सुदिनान्यपि दुर्दिनायन्ते । अत्र दुर्दिनसदृशमर्थः।

वि+स्मृ- अनभ्यस्तो विस्मरति पदार्थान् । अत्र स्मरणार्थकस्य स्मृधातोर्व्युपसर्गबलेन विस्मरणमर्थः । विस्मरणं च स्मरणाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि+भूष्-विभूषयति बिद्वांसम् । अत्र अलङ्करणार्थकस्य भूष्(षि) धातोर्विशेषेणालङ्करणमर्थो व्युपसर्गबलेन ।

वि+कृ- 'मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः' । अत्र करणार्थकस्यापि कृधातोर्विकारोऽर्थः व्युपसर्गतः । एवं चित्तं विकरोति कामः इत्यत्रापि ।

वि+लप्- 'विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम्' । अत्र भाषणार्थकस्यापि लप्धातोर्विलपनं रोदनादिकं वाऽर्थः ।

वि+हृ- 'विहरति हरिरिह सरसवसन्ते' (गीतगो.) अत्र हरणार्थकस्य हृधातोर्भ्रमणं, गमनादिकं वार्थः सम्पन्नः । विरमति पापात् इत्यादौ क्रीडार्थकस्यापि रमतेर्विरमणं पृथग्भवनं विश्रामो वार्थः प्रतीयते ।

उद्+ आङ+ कृ- श्येनो वर्त्तिकामुदाकुरुते । अत्र कृधातोर्भर्त्सनमर्थः ।

आ+चर- आचरति कपटेन । अत्र गतिभक्षणार्थकस्य चरधातोराचरणमनुष्ठानं वार्थः, आङुपसर्गबलेन ।

आ+हृ- 'वित्तस्यं विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति' । अत्र हरणार्थकस्यापि हृधातोराङुपसर्गबलेन आनयनमर्थः ।

आ+दिश- स्वामी सेवकानादिशति । अत्रोच्चारणक्रियस्य दिश्धातोराज्ञापनमर्थः । एवमन्यत्रापि ।

नि+ ग्रह- शीघ्रमयं दुष्टवणिक् निगृह्यताम् । अत्र नि इत्युपसर्गबलेन ग्रहणार्थकस्यापि ग्रहधातोः कारागारे स्थापनं दण्डनं वा अर्थः सम्पन्नः ।

नि+ वृतु- प्रसमीक्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात् (मनु.) । अत्र न्युपसर्गबलेन वर्त्तनार्थस्यापि वृतु वर्त्तने इत्यस्य निवृत्तिः पराङ्मुखता वा अर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नि+धा- पादं निदधाति पूर्वम् । अत्र धारणपोषणार्थकस्य धाधातोर्नि इत्युपसर्गबलेन स्थापनं न्यासनादिकं वाऽर्थः सञ्जातः ।

नि+मत्रि-ब्राह्मणान् निमन्त्रयस्व । अत्र गुप्तभाषणार्थकस्यापि मत्रिधातोर्न्युपसर्गबलेन निमन्त्रणमर्थः । निमन्त्रणं नियोगकरणम् ।

अधि+गम्-अधिगच्छति शास्त्रार्थम् । अत्र गमनार्थकस्य गम्धातो रध्युपसर्गबलेन ज्ञानं बोधो वार्थः सञ्जातः ।

अधि+कृ- अधिकरोति भूभागम् । अत्र डु कृञ् करणे इति करणार्थकस्य कृधातोरधिकरणम् - स्वायत्तीकरणं स्वत्वोत्पादनं वा अर्थः । एवं ते नाम जयिनो ये शरीरस्थान् रिपून् अधिकुर्वतेइति।

अधि+आस् - राजा सिंहासनमध्यास्ते । अत्र उपवेशनार्थस्य आस्धातोरारोहणम् अधिवसनं वा अर्थः ।

अधि+स्था- साधवः साधुतामधितिष्ठन्ति । अत्र गतिनिवृत्त्यर्थकस्य स्थाधातोर्नित्यसम्बन्धोऽधिकारो वाऽप्यर्थः प्रतीयते ।

अधि+षो - अध्यवस्यति तत्वानि । अत्र अन्तकर्मार्थकस्य षोधातोरध्यवोपसर्गबलेन निर्णयो ज्ञानादिकं वाऽर्थः ।

अति+ शीङ्- अतिशेते सर्वान् । अत्र शयनार्थकस्य शीङ्धातोरत्युपसर्गबलेन अतिशय आधिक्यं सर्वोत्कृष्टत्वं वाऽर्थः ।

अति+आ+ चर- धनिका निर्धनान् भूमिहीनांश्च अत्याचरन्ति । अत्र गतिभक्षणार्थकस्य चरधातोरत्याचरणं शोपणं वार्थोऽति-आ इत्युपसर्गद्वयबलेन । एवं 'पुत्राः पितृनत्यचरन् नार्यश्चात्यचरन् पतीन्' । अत्र उल्लङ्घनादिकमर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अति+ वह (णिजन्त) 'किं वा मयापि न दिनान्यतिवाहितानि' । अत्र प्रापणार्थकस्यापि वाहिधातोर्व्यतियापनं समापनं वार्थः सञ्जातः ।

अति+क्रम्-यथा यथा यौवनमतिचक्राम । अत्र पादविक्षेपार्थकस्य क्रम्धातोर्व्यतियापनमतिक्रमणादिकं वार्थः सञ्जातः ।

अपि+नह- अपिनह्यति हारम् । बन्धनार्थकस्य नह्धातोर्धारणमर्थः। स चाप्युपसर्गबलेन ।

अपि+धा- दोषानपिदधाति सः । अत्र अपि इत्युपसर्गेण आच्छादनमर्थः।

सु +-शुभ्- पर्वतेषु सुशोभते हरितं वनम् । अत्र सु इत्युपसर्गबलेन अधिकशोभनमर्थः । एवं सुजायन्ते पुष्पाणि । सुसिञ्चति वीरुधः । सुस्तौति भगवन्तम् । इत्यादिषु पूजार्थः सम्यगर्थो वा प्रतीयते ।

सु+चूर्णि- सुचूर्णयति भेषजम् ।अत्र सूपसर्गबलेन सूक्ष्मचूर्णीकरणमर्थः।

उद्+स्था- 'उत्तिष्ठोतिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज !
उत्तिष्ठ नरशार्दूल सायंसन्ध्या प्रवर्त्तते' ।

अत्र गतिनिवृत्त्यर्थकस्य स्थाधातोर्जागरणमर्थः स चोदुपसर्गबलेन ।

उद्+ धृ- उद्धरेदात्मनात्मानम् । अत्रोद्धार उन्नतिर्वा धरतेरर्थः ।

उद्+चर- नास्तिका धर्मोपदेशं नोच्चरन्ते । अत्र उदुपसर्गबलेन गतिभक्षणार्थकस्य चरतेरुच्चारणं प्रतिपादनं वाऽर्थः । एवं धर्ममुच्चरते सुधीरित्यत्राति बोध्यम् ।

उद्+ इण्- " उदेति सविता ताम्रस्ताम्र एवास्तमेति च । " अत्र गमनार्थकस्य इण्धातोरुदयः प्रारम्भो वार्थो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्+लस् - उल्लसति मुखम् । अत्र श्लेपणक्रीडनार्थकस्य लस्धातोः प्रसन्नता सुशोभनं वाऽर्थः सम्पद्यते ।

उद्+गम्- उद्गच्छति धूमः । अत्र उपरिगमनम् उत्पत्तिर्वा उद्गच्छतेरर्थः।

अभि+धा- शब्दोऽर्थमभिदधाति । अत्र धाधातोरभ्युपसर्गबलेन उक्तिः प्रकाशनं वाऽर्थः ।

अभि+अस् - छात्रः पाठमभ्यस्यति । अत्र अभ्यास कण्ठस्थीकरणं वाऽर्थः ।

अभि+अर्थ-यदि सा तापसकन्या अभ्यर्थनीया (शाकु) अत्र अभ्युपसर्गबलेन पूर्णा याचना प्रतीयते।

अभि+नी- "अभिनयति विपश्चिद् रामकृष्णार्जुनादीन् " । अत्र प्रापणार्थकस्य नीधातोरभिनयोऽनुकरणं वार्थोऽभ्युपसर्गबलेन ।

अभि+भू - अभिभवति शत्रून् । अत्र अभ्युपसर्गबलेन विजयोऽर्थः भूधातोर्भवति ।

प्रति+इण्- न स प्रत्येति दुष्टात्मा । अत्र गमनार्थकस्य इण्धातोः आगमनमुपस्थितिर्वा अर्थः प्रत्युपसर्गबलेन ।

प्रति+ईक्ष-प्रतीक्षस्व सदैव त्वं कार्यं सिद्धं भविष्यति । अत्र दर्शनार्थकस्य ईक्षधातोः प्रतीक्षणं धैर्यधारणं वाऽर्थः ।

प्रति+वद्- "तान् प्रत्यवादीदथ राघवोऽपि"।

अत्र प्रत्युपसर्गसहितस्य वद्धातोः प्रत्युत्तरणमर्थः।

प्रति+ज्ञा-देशे निर्धनतानिर्मूलनं प्रतिजानीते । अत्र प्रत्युपसर्गबलेन प्रतिज्ञाकरणं सङ्कल्पो वाऽर्थो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रति+बन्ध- प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः । अत्र प्रतिबन्धो नाशनं वार्थः प्रत्युपसर्गबलेन ।

परि+ईक्ष- परीक्षते प्राध्यापक उत्तरपुस्तकानि । अत्र परि उपसर्गसहितस्य ईक्षतेर्मूल्याङ्कनं योग्यतानिर्धारणं वार्थः ।

परि+वृत्- दुग्धं दध्नि परिवर्त्तते । अत्र वर्त्तनार्थकस्य वृतुधातोः परिवर्त्तनं परिणमनं वाऽर्थः।

परि+हस्-परिहसति साधून् । अत्र हसनार्थकस्य हस्धातोरुपहासस्तिरस्कारो वार्थः परि इत्युपसर्गबलेन ।

परि+चर- भृत्याः स्वामिनं परिचरन्ति । अत्र चर्धातोः सेवा कैङ्कर्यं वाऽर्थ परि उपसर्गबलेन ।

परि+नी-रामः सीतां परिणिनाय । अत्र नयनार्थकस्य नयतेर्विवाहोऽर्थः परि इत्युपसर्गबलेन ।

परि+वृत्-चक्रवत्परिवर्त्तन्ते दुःखानि च सुखानि च ।अत्र वर्त्तनार्थकस्य वृतुधातोः परिवर्त्तनं पर्यायो वाऽर्थो भवति ।

उप+स्था- राजमार्गोऽयं राजधानीमुपतिष्ठते । अत्र गतिनिवृत्यर्थकस्य स्थाधातोरुपस्थितिरर्थः उपोपसर्गबलेन ।

उप+हृ- देवेभ्यो बलिमुपहरेत् । अत्र हृधातोः प्रदानं समर्पणं वार्थः। स चोपोपसर्गबलेन ।

उप+इण्-उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः । अत्र गत्यर्थकस्य इण्धातोरुपस्थितिर्नित्यसम्बन्धो वा अर्थः, उपोपसर्गबलेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप+वस् -एकादशीमुपवसति । अत्र उपोपसर्गसहितस्य वस्धातो र्व्रताचरणम्, अनशनं वार्थः । स चोपोपसर्गबलेन । अन्यथा वस निवासे इति सत्त्वात् निवास एवार्थः स्यात् । एवम् उपसर्गाः प्रायेण तिङन्तपदे उपसृज्यन्ते। कृदन्ते क्रियापदे च तेषामुपयोगो दृश्यते- विनष्टः ,अनुभूतः आकृष्टः अनुगत इत्येवंरूपेण । एवञ्च उपसर्गा धातुसम्वद्धा इति धात्वर्थविविधीकर्त्तार इति च सारः।

अभ्यासः

प्रश्नाः

१. अव्ययस्य किं लक्षणम् ?

२. अव्ययं कतिविधम् कानि च तेषामुदाहरणानि?

३. किमुपसर्गाणां लक्षणं ? के च ते ?

४. उपसर्गसहितानि दश तिङन्तक्रियापदानि लेखनीयानि ।

५. परस्परं मेलयत–

क.	प्र.	क. परीक्षते शिक्षकः ।
ख.	अनु	ख. नार्यश्चात्यचरन् पतीन् ।
ग.	अभि	ग. प्रतीक्षस्व सदैव त्वम् ।
घ.	आङ्	घ. छात्रः पाठमभ्यस्यति ।
ङ	अति	ङ. पर्यटकः पर्वतमारोहति ।
च.	प्रति	च. कृष्णः कंसं शिरसि प्राहरत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छ. परि छ. सखीभ्यामन्वास्ते ।

६. कस्मात् कोऽर्थः प्रतीयते ? मेलयत-

क. प्रणिपतति शिष्य उपाध्यायचरणयोः ।	क. प्रस्थानम् ।
ख. हिमवतो गङ्गा प्रभवति ।	ख. प्रहारः ।
ग. प्रसीद विश्वेश्वरि पाहि विश्वम् ।	ग. प्रणामः ।
घ. प्रीतः प्रतस्थे मुनिराश्रमाय ।	घ. प्रकटता ।
ङ कृष्णः कंसं शिरसि प्राहरत्	ङ. प्रसन्नता ।

=०=

षष्ठपाठः

सुबन्तशिक्षणं नामरूपावलीनिरूपणञ्च

व्याकरणशास्त्रप्रवृत्तौ मूलं संज्ञा भवति । अतः संज्ञाप्रकरणं पूर्वमुक्तम् । ततश्च सुबन्तादिपदसिद्धेः सन्ध्यपेक्षत्वात् सन्धयोऽप्युक्ताः । इदानीं सुबन्तशिक्षणप्रसङ्गे यथासम्भवं वर्णनिर्देशक्रमेण अजन्तपुंल्लिङ्गादिप्रकरणं प्रारभ्यते । अव्युत्पन्नस्य रामादिशब्दस्य 'अर्थवदिति व्युत्पन्नस्य कृत्तद्धितेति प्रातिपदिकसंज्ञायां कृतायां सर्वेषु च स्वादिषु प्राप्तेषु -

१. द्व्येकयोर्द्विवचनैकवचने (१/४/२२)

एकत्वे एकवचनं द्वित्वे च द्विवचनं स्यात् । तत्र एकत्वविवक्षायां राम+सु

इतिस्थितेऽनुबन्धलोपे सस्य 'ससजुषो रुः , इति रुत्वेऽनुबन्धलोपे रेफस्य विसर्गे सिद्धं रुपं ' रामः ' इति ।

राम +राम इति स्थिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. सरूपाणामेकशेष एकविभक्तौ (१/२/६४)

विभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेकः शिष्यते । इति एकशेषः । द्वित्वविवक्षायाम् औविभक्तौ राम+औ इति स्थिते —

३. प्रथमयोः पूर्वसवर्णः (६/१/१०२)

इको यणचि इत्यत 'अचि' इति 'अकः सवर्णे दीर्घः' इत्यतश्च 'अक' इति चानुवर्त्तते । 'एकः पूर्वपरयोः' इति च । एवम् अकः प्रथमा द्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्' इत्यर्थः । इति प्राप्ते —

४. नादिचि (६/१/१०४)

अवर्णादिचि न पूर्वसवर्णदीर्घः । वृद्धिः । रामौ ।

५. बहुषु बहुवचनम् (१/४/२१)

बहुत्वे बहुवचनं स्यात् । एकशेषे कृतेऽनेन बहुत्वे बहुवचने राम+जस् इति स्थिते —

६. चुटू (१/३/७)

'आदिर्ञिटुडवः' षः प्रत्ययस्येति पूर्वसूत्राभ्याम् आदिरिति प्रत्ययस्येति चानुवर्त्तेते । तेन प्रत्ययाद्यौ चुटू इतौ स्त इत्यर्थः । इति जस्येत्त्वे लोपे च कृते जसः सकारस्यापि इत्त्वे प्राप्ते --

७. न विभक्तौ तुस्माः (१/३/४)

विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः । इति न सस्येत्वम् । राम+अस् इत्यत्र पूर्वसवर्णदीर्घे सिद्धं रूपं 'रामाः' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८. एकवचनं सम्बुद्धिः (२/३/४८)

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्।

९. एङ्ह्रस्वात्सम्बुद्धेः (६/१/६९)

सम्बुद्धया अङ्गमाक्षिप्यते । तेन तदन्तविधिः । एङन्ताद् ह्रस्वान्ताच्च अङ्गाद्धल लुप्यते सम्बुद्धेश्चेत् । हे राम । हे रामौ । हे रामाः।

१०. अमि पूर्वः (६/१ /१०७)

अकः सवर्णे दीर्घ 'इत्यतो दीर्घ इति' इको यणचीत्यतोऽचीति च । अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यादित्यर्थः । रामम् । रामौ ।

११. लशक्वतद्धिते (१/३/८)

तद्धितवर्जप्रत्ययाद्याः लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा ।

१२. तस्माच्छसो नः पुंसि (६/१/१०३)

पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात् पुंसि । इति नत्वे-

१३. अट्कुप्वाङ्नुम्व्यवायेऽपि (८ /४ /२)

''रषाभ्यां नो णः समानपदे' इति सूत्रमनुवर्त्तते । अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधाने ऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे । इति णत्वे प्राप्ते –

१४. पदान्तस्य (८/४/३७)

पदान्तस्य नस्य णत्वं न स्यात् । रामान् ।

१५. टाङसिङसामिनात्स्याः(७/१/१२)

अकारांन्तादङ्गाट्टादीनां क्रमादिनादयः स्युः । णत्वम् । रामेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६. सुपि च (७/३/१०२)

यञीत्यनुवर्त्तते 'अतो दीर्घ' इत्यतः । अल्ग्रहणात्तदादिविधिः । यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात् । रामाभ्याम् ।

१७. अतो भिस ऐस् (७।१।९)

अकारान्तादङ्गाद् भिस ऐस् स्यात् । रामैः ।

१८. ङेर्यः (७।१।१३)

अतोऽङ्गात् परस्य ङेर्यः स्यात् । रामाय । रामाभ्याम्

१९. बहुवचने झल्येत् (७।३।१०३)

झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात् । रामेभ्यः ।

२०. वाऽवसाने (८।४।५६)

अवसाने झलां चरः स्युर्वा । आत् आदेशे विकल्पेन चर्त्वे जश्त्वम् । रामात् । रामाद् । रामाभ्याम् । रामेभ्यः । रामस्य ।

२१. ओसि च (७।३।१०४)

ओसि परेऽतोऽङ्गस्यैकारः स्यात् । रामयोः ।

२२. ह्रस्वनद्यापो नुट् (७।१।५४)

आमि सर्वनाम्नः सुडित्यतः 'आमि' इत्यनुवृत्तं षष्ठ्या विपरिणम्यते ।

विपरिणामश्च-

अनन्वितार्थकविभक्त्यादित्यागेनान्वययोग्यविभक्त्यादिकल्पनम्। ह्रस्वान्तान्नद्यन्तात आबन्ताच्चाङ्गात् परस्यामो नुडागमः स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२३. नामि (६।४।३)

नामि परेऽजन्ताङ्गस्य दीर्घः स्यात् । रामाणाम् । रामे । रामयोः । सुपि एत्वे कृते—

२४. आदेशप्रत्यययोः (८।३।५९)

"इण्कोः" 'अपदान्तस्य मूर्धन्य' इत्यधिक्रियेते । 'सहेः साड षः' इत्यत स इत्यनुवर्त्तते । एकापि षष्ठी विषयभेदात् भिद्यते । अयमर्थः— इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः षकारः स्यात् । रामेषु । एवञ्चेयं रामशब्दस्य रूपतालिका –

	ए.व.	द्वि.व.	बहु.व.
प्र.	रामः	रामौ	रामाः।
द्वि.	रामम्	रामौ	रामान् ।
तृ.	रामेण	रामाभ्याम्	रामैः ।
च.	रामाय	रामाभ्याम्	रामेभ्यः।
प.	रामात्-द्	रामाभ्याम्	रामेभ्यः ।
ष.	रामस्य	रामयोः	रामाणाम् ।
स.	रामे	रामयोः	रामेषु ।
सम्बो.	हे राम !	हे रामौ !	हे रामाः !

एवम् – कृष्ण–बाल–पुत्र–जनक–प्राज्ञ–सज्जन–दुर्जन–खल–घट–शिष्यादयः ।

कविः । पूर्वसवर्णदीर्घे कवी । कवि+अस् इति स्थिते —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२५. जसि च (७/३/१०९)

'ह्रस्वस्य गुणः' इत्यनुवर्त्तते । अङ्गस्येत्यधिकृतम्।

(ह्रस्वाङ्गयोर्विशेषणविशेष्यभावात्तदन्तविधिः।) ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे । कवयः

२६. ह्रस्वस्य गुणः (७/३/१०८)

सम्बुद्धौ इत्यनुवर्त्तते । ह्रस्वस्य गुणः स्यात् सम्बुद्धौ । सम्बुद्धिलोपः । हे कवे । कविम् । कवी । कवीन् । तृतीया एकवचने —

२७. शेषोध्यसखि (१/४/७)

'यू स्त्र्याख्यौ नदी" इत्यतो 'यू' इति 'ङिति ह्रस्वश्चेत्यतो ह्रस्व इति चानुवर्त्तते । उक्तादन्यश्शेषः । अत्र ह्रस्वौ इदुतौ तदर्थः । अयमर्थः— अनदीसंज्ञौ ह्रस्वौ यौ इदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् ।

२८. आङो नाऽस्त्रियाम् (७/३/१२०)

आङिति टासंज्ञा प्राचाम् । अच्च घेरित्यतो घेरित्यनुवर्त्तते — घेः परस्याङो ना स्यादस्त्रियाम् । कविना । कविभ्याम्।

२९. घेर्ङिति (७/३/१११)

घिसंज्ञकस्य ङिति सुपि गुणः स्यात् । कवये । कविभ्याम् । कविभ्यः । ङसि 'घेर्ङितीति गुणे कृते —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३०. ङसिङसोश्च (६/१/११०)

एकः पूर्वपरयोरित्यधिकारः । एङः पदान्तादित्यत एङ इति, अतीति चानुवर्त्तते । 'अमि पूर्वः " इत्यतः पूर्वग्रहणञ्च । एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् । कवेः । कविभ्याम् । कविभ्यः । कवेः । कव्योः । कवीनाम् ।

३१. अच्च घेः (७/३/११९)

"इदुद्भ्याम्" 'औत्" इति सूत्रद्वयमनुवर्त्तते। ङेराम् इत्यतौ ङेरिति च इदुद्भ्यामुत्तरस्य ङेरौत् स्यात्, घेरन्तादेशश्चाकारः । कवौ । कव्योः । कविषु।

एवमस्येयं रूपतालिका —

प्र.	कविः	कवी	कवयः ।
द्वि.	कविम्	कवी	कवीन् ।
तृ.	कविना	कविभ्याम्	कविभिः ।
च.	कवये	कविभ्याम्	कविभ्यः ।
प.	कवेः	कविभ्याम्	कविभ्यः ।
ष.	कवेः	कव्योः	कवीनाम् ।
स.	कवौ	कव्योः	कविषु ।
सम्बो.	हे कवे !	हे कवी !	हे कवयः !

एवम् हरिश्रीपत्यग्निमुनिविधिनिधिगिरिपाणिसेनापतिमरीच्यादयः । विधुः । अस्मिन्नपि शब्दे कविशब्दे प्रवृत्तानि सूत्राणि प्रवर्त्तन्ते । रूपेपु पार्थक्यात् तत्तालिका दीयते[1] —

प्र.	विधुः	विधू	विधवः ।
द्वि.	विधुम	विधू	विधून ।

---

१ – अस्य सिद्धिप्रकारः शिक्षकैश्शिक्षणीयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृ.	विधुना	विधुभ्याम्	विधुभिः ।
च.	विधवे	विधभ्याम्	विधुभ्यः ।
प.	विधोः	विधुभ्याम्	विधुभ्यः ।
ष.	विधोः	विध्वोः	विधूनाम् ।
स.	विधौ	विध्वोः	विधुषु ।
सम्बो.	हे विधो !	हे विधू !	हे विधवः !

एवम्

गुरुभानुकृशानुशम्भुशिशुवायुपशुतरुशत्रुबाह्वादयः।

३२ . ऋदुशनस्पुरुदंसोऽनेहसाञ्च (७/१/९४)

'अनङ् सौ' इत्यनुवर्त्तते । ऋतोऽङ्गस्य विशेषणात्तदन्तविधिः । उशनसादीनान्तु न भवति, ग्रहणवत् प्रातिपदिकत्वात्[2]। अयमर्थः–

ऋदन्तानामुशनसादीनाञ्च अनङ् स्यादसम्बुद्धौ सौ परे ।

३३. अलोऽन्त्यात्पूर्व उपधा (१।१।६५)

अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् ।

३४. सर्वनामस्थाने चासम्बुद्धौ (६।४।८)

'नोपधाया इति 'ढ्रलोपे ' इत्यतो दीर्घग्रहणञ्चानुवर्त्तते––नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे ।

२. उगिद्भिन्नत्वे सति वर्णभिन्नत्वे सति प्रत्ययग्रहणभिन्नत्वं ग्रहणवत् प्रातिपदिकत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५. हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६।१।६८)

हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते ।

३६. नलोपः प्रातिपदिकान्तस्य (८।२।७)

प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात् । पिता । पितृ+औ इति स्थिते –

३७. ऋतो ङिसर्वनामस्थानयोः (७।३।११०)

'ह्रस्वस्य गुण' इत्यतो गुण इति अनुवर्त्तते । अङ्गस्येत्यधिकृतम् । तद्विशेषणम् ऋत इति । अतस्तदन्तविधिः– ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । रपरः । पितरौ । पितरः । पितरम् । पितरौ । पितॄन् । पित्रा । पितृभ्याम् । पितृभिः । पित्रे । पितृभ्याम् । पितृभ्यः । ङसि विभक्तौ पितृ अस् इति स्थितौ–

३८. ऋत उत् (६।१।१११)

'ङसिङसोश्च' इति 'एङ पदान्तादित्यत अतीति चानुवर्त्तते । अङ्गस्येत्यधिकृतस्य विशेषणमृत इति । अतस्तदन्तविधिः । ऋदन्तात् ङसिङसोरति परे उकार एकादेशः स्यात् ।

३९. रात्सस्य (८।२।२४)

रेफात् संयोगान्तस्य सस्यैव लोपो नान्यस्य । रेफस्य विसर्गः । पितुः । पितृभ्याम् । पितृभ्यः । पितुः । पित्रोः । पितृ+नाम् इति स्थितौ –

४०. ऋवर्णान्नस्य णत्वम् (वा.) पितॄणाम् । पितरि । पित्रोः । पितृषु । हे पितः ।

इयं रूपतालिकाऽस्य –

पिता	पितरौ	पितरः ।
पितरम्	पितरौ	पितॄन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पित्रा	पितृभ्याम्	पितृभिः ।
पित्रे	पितृभ्याम्	पितृभ्यः ।
पितुः	पितृभ्याम्	पितृभ्यः ।
पितुः	पित्रोः	पितॄणाम् ।
पितरि	पित्रोः	पितृषु ।
हे पितः !	हे पितरौ !	हे पितरः !

एवम् मातृ देवृ जामातृ नृशब्दाः । प्रथमाया द्विवचनबहुवचने, द्वितीया एकवचनद्विवचने च त्यक्त्वा कर्त्तृ नेतृ वक्तृ श्रोतृ सवितृ रक्षितृशब्दा अप्येवमेव।

अभ्यासः

प्रश्नाः

१. रामौ रामान् इत्यनयोः सिद्धिप्रकार प्रदर्शनीयः ।

२. रामौ, रामेषु इत्यनयोरावश्यके प्रधानसूत्रे के ?

३. प्रथमयोः पूर्वसवर्ण इत्यस्यार्थो लेख्यः ।

४. जनकशब्दस्य रूपतालिका देया ।

५. कस्य कि निमित्तं परस्परं मेलयत

क. नामि	क. बहुत्वम् ।
ख. अमि पूर्वः	ख. प्रथमाद्वितीययोरचि ।
ग. बहुषु बहुवचनम्	ग. अम्यचि।
घ. प्रथमयोः पूर्वसवर्णः	घ. अवसाने।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ. वाऽवसाने　　　　　　　　　ङ. नामि ।

६. कवी, कविना, इतीमौ साधनीयौ ।

७. अच्च घेः इत्यस्यार्थापनप्रकारो देय :

८. गुरुशब्दस्य रूपतालिका देया ।

९. हरिशब्दस्य तृतीयैकवचने रूपं साध्यम् ।

१०. कुत्र प्रयोग किं निमित्तं सम्भवति ?

क. हे कवे ?	क. जसि परे।
ख. कविना	ख. सम्वुद्धौ ।
ग. कवेः	ग. इदुद्भ्यामुत्तरो ङिः ।
घ. कंवौ	घ. ङसिङसोरति ।
ङ. कवयः	ङ. अस्त्रियाम् ।

=०=

अथाजन्तस्त्रीलिङ्गाः

सीता

४१. औङ आपः (७।१।१)

अङ्गस्येत्यधिकृतम् पञ्चम्या विपरिणम्यते । जसः शीत्यतश्शीत्यनुवर्त्तते । आवन्तादङ्गात् परस्यौङः शी स्यात् । औङिति प्रथमाद्वितीयाद्विवचनयोः संज्ञा । सीते । सीताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४२. सम्बुद्धौ च (७।३।१०६)

आङि चाप इत्याप इति, बहुवचने झल्येदित्यतश्च् एदिति चानुवर्त्तते-आप एकार स्यात् सम्बुद्धौ । हे सीते । हे सीते । हे सीताः । सीताम् । सीते । सीताः । अत्र पुंस्त्वाभावान्नत्वाभावः ।

४३. आङि चापः (७।३।१०५)

चकारात् ओसि च इत्यत ओसीत्यनुवृत्तम् । अङ्गस्येत्यधिकृतम् । प्रत्ययत्वादापस्तदन्तविधिः । एदिति चानुवर्त्तते आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात् । सीतया । सीताभ्याम् । सीताभिः।

४४. याडापः (७।३।१३)

घेर्ङितीत्यतो ङितीत्यनुवृत्तम् आपः परस्य ङिद्वचनस्य याडागमः स्यात् ।'वृद्धिरेचि' । सीतायै । सवर्णदीर्घः । सीतायाः । सीतयोः । सीतानाम् । सीता ङि इति स्थितौ।

४५. ङेराम्नद्याम्नीभ्यः (७।३।११६)

नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् स्यात् । सीतायाम । सीतयोः । सीतासु ।

इयं तालिकाऽस्य-

सीता	सीते	सीताः
सीताम्	सीते	सीताः ।
सीतया	सीताभ्याम्	सीताभिः ।
सीतायै	सीताभ्याम्	सीताभ्यः ।
सीतायाः	सीताभ्याम्	सीताभ्यः ।
सीतायाः	सीतयोः	सीतानाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सीतायाम् सीतयोः सीतासु ।
हे सीते ! हे सीते ! हे सीताः !

एवम्–लता-पाठशाला-क्रीडा-कथा-कन्या-वसुधा-सुधा-व्यथा-प्रभाऽजादयः।

गौरी । गौरीशव्दादौविभक्तौ पूर्वसवर्णदीर्घे प्राप्ते -

४६. दीर्घाज्जसि च (६।१।१०५) प्रथमयोरित्यतः पूर्वसवर्ण इति नादिचीत्यता नेति इचीति चानुवर्त्तते दीर्घाज्जसि इचि च परे प्रथमयो : पूर्वसवर्णदीर्घो न स्यात । इति तस्मिन् निपिद्धे यण् । गौर्यौ । गौर्यः । गौरी : । गौर्या । गौरीभ्याम । गौरीभिः । गौरी+ङे इति जाते

४७. यूस्त्र्याख्यौ नदी (१।४।३) इदुदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः ।

४८. आण्नद्याः (७।३।११२) नद्यन्तात् परेषां ङितामाडागमः स्यात्।

४९. आटश्च (६।१।९०) आटोऽचि परे वृद्धिरेकादेशः स्यात् । गौर्यै । गौरीभ्याम । गौरीभ्यः। गौर्याः । गौर्योः । नद्यन्तात् परत्वात् नुट् । गौरीणाम् । गौर्याम् । गौर्यो : । गौरीषु ।

५०. अम्बार्थनद्योर्ह्रस्वः (७।३।१०७) अम्बार्थानां नद्यन्तानाञ्च ह्रस्वः स्यात् सम्बुद्धौ । हे गौरि ! हे गौर्यौ ! हे गौर्यः ! अस्य सर्वाणि रूपाणि उक्तानि तालिका स्वयं सङ्कलनेन निर्मेया । एवम् नदी-कुमारी-नारी-सखी-पुत्री- महिषी-कौमुदी-नगरी-श्रीमती-दासीत्यादयोऽपि बोध्याः ।

=०=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासः

प्रश्नाः
१ सीते, सीतायै, सीतायाम् इति रूपत्रय साध्यताम् ।
२.औङिति कस्य संज्ञेति विलिख्य, सीताशब्दस्य द्वितीयावहुवचने कथन्न नत्वमिति लिखत ।
३. पाठशालाशब्दस्य रूपतालिका का ?
४. कथाशब्दस्य सप्तमीविभक्तौ कीदृशानि रूपाणि भवन्ति ? लिखत
५. कस्य निमित्तस्य कुत्र प्रयोगे सम्प्राप्तिः ? मेलयत

क. आवन्तादङ्गात् परस्यौङः	क सीतायाम्
ख. सम्वुद्धौ	ख.सीतया सीतयोः
ग. आवन्तात् परस्य ङे	ग.सीतायै
घ. आङि ओसि च परे	घ.हे सीते !
ङ. आपः परस्य ङिद्वचनस्य	ङ.सीते

६. गौर्यैः, हे गौरि ! इत्यनयोः सिद्धिप्रकारो देयः
७. नदीशब्दस्य रूपतालिका देया
८. महिपीशब्दस्य पष्ठयां विभक्तौ रूपाणि लेख्यानि
९. कस्य सूत्रस्य किं निमितं मेलयत

क. अम्वार्यनद्योर्हस्वः	क.जसि इचि च परे ।
ख. आण् नद्याः	ख़.अचि परे ।
ग. आटश्च	ग.नद्यन्तात्परेपां ङिताम् ।
घ. दीर्घाज्जसि च	घ.ईदूदन्तौ नित्यस्त्रीलिङ्गौ
ङ. यू स्त्र्याख्यौ नदी	ङ.सम्बुद्धौ ।

=o=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मति

अजन्तनपुंसकलिङ्गाः

(अकारस्य पथमोपस्थिततया तदन्तमेव क्लीबमुदाहर्त्तुकामनया स्वमोरम्विधायकं सूत्रं पूर्वम् तदनन्तरं चान्यानि निबध्यन्ते)

५१ अतोऽम् (७।१।२५)

अङ्गस्येत्यधिक्रियते । तस्य च अत इति पञ्चम्यनुरोधात् विभक्तिविपरिणामः । तदन्तविधिः । स्वमोर्नपुंसकादितिचानुवर्त्तते-अतोऽङ्गात् क्लीबात् परयोः स्वमोरम् स्यात् । अमि पूर्वः । ज्ञानम् । एङ्ह्रस्वादिति हल्मात्रलोप : । हे ज्ञान

५२. नपुंसकाच्च (७।१।१९)

न पुमान् इति नपुंसकम्, तस्मादिति । औङ आप इति औङ इति जसः शीत्यतश्च शीति चानुवर्त्तते- क्लीवात्परस्यौङः शी स्यात् । ज्ञान+जस इति स्थिते -

५३ . जश्शसोः शिः (७।१।२०)

क्लीबादनयोः शिः स्यात् ।

५४. शि सर्वनामस्थानम् (१।१४२)

शि इत्येतत् सर्वनामस्थानसंज्ञं स्यात् ।

५५. नपुंसकस्य झलचः(७।१।७२)

अङ्गस्येति वर्त्तते । बिशेष्यविशेषणभावात्तदन्तविधिः । इदितो नुम्धातोरित्यतो नुम् इति, उगिदचामित्यतश्च सर्वनामस्थाने इति च । झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे । उपधादीर्घः । ज्ञानानि । द्वितीयायामपि प्रथमावद्रूपाणि शेषं रामवत् । इयं रूपाणां तालिका ।

ज्ञानम् ज्ञाने ज्ञानानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानम्	ज्ञाने	ज्ञानानि
ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
ज्ञानाय	ज्ञानाभ्याम्	ज्ञानेभ्यः
ज्ञानात्-द्	ज्ञानाभ्याम्	ज्ञानेभ्यः
ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
ज्ञाने	ज्ञानयोः	ज्ञानेषु
हे ज्ञान !	हे ज्ञाने !	हे ज्ञानानि !

एवम् धन-वन-फल-गृह-रत्न-तत्त्व-बल-वचन-मौन-कुसुमोद्यानादयोऽपि ज्ञेयाः ।

५६. स्वमोर्नपुंसकात् (७।१।२३)

अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । "षड्भ्यो लुक्" इत्यतो लुक् इति चानुवर्त्तते । क्लीबादङ्गात् स्वमोर्लुक् स्यात् वारि ।

५७. इकोऽचि विभक्तौ (७।१।७३)

अङ्गस्येति अधिकारो वर्त्तत एव, इका विशेष्यविशेषणभावात्तदन्तविधिः । नपुंसकस्येति नुमिति चानुवर्त्तते-इगन्तस्य क्लीवस्य नुमागमः स्यात् अचि विभक्तौ वारिणी । वारीणि । न लुमताङ्गस्य इति प्रत्ययलक्षणनिषेधस्यानित्यत्वात् पक्षे सम्बुद्धिनिमित्तको गुणः । हे वारे । हे वारि । द्वितीयायामपि प्रथमावद्रूपाणि । वारिणा । वारि + ए इत्यत्र घेर्ङितीति गुणे प्राप्ते-

५८."वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन" । वारिणे । वारिणः। वारि आम् इत्यत्र परत्वात्प्राप्तं नुमं प्रबाध्य-

५९. "नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन" इति नुट् । तेन नामि इति दीर्घः । वारीणाम् । वारिणि । वारिणोः । वारिषु । हलादौ कविवत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	वारिणी	वारीणि
वारि	वारिणी	वारीणि
वारिणा	वारिभ्याम्	वारिभिः
वारिणे	वारिभ्याम्	वारिभ्यः
वारिणः	वारिभ्याम्	वारिभ्यः
वारिणः	वारिणोः	वारीणाम्
वारिणि	वारिणोः	वारिषु
हे वारे ! हे वारि !	हे वारिणी !	हे वारीणि !

एवम दधि-सक्थि-अक्षि-अस्थि-शव्दान विहायाऽन्येपीकारान्ता नपुंसकलिङ्गाः शव्दा वोध्याः ।

=o=

अभ्यासः

प्रश्नाः

१. अतोऽम् इति सूत्रस्य कोऽर्थः ?

२. हे ज्ञान इत्यस्य सिद्धिप्रकारः कः ?

३. वचनशव्दस्य रूपतालिका निर्मेया

४. वारीणि, वारीणाम् इतीमौ साधनीयौ

५. परस्परं मेलयत

क. ज्ञाने क. नुम्पूर्वविप्रतिपेधेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ख. ज्ञानानि	ख. स्वमोर्लुक् ।
ग. वारि	ग. नुट् पूर्वविप्रतिपधेन ।
घ. वारिणाम्	घ औङः शी ।
ङ. वारिणे	ङ. शि सर्वनामस्थानम् ।

=o=

हलन्तपुल्लिङ्गाः

श्रीरस्त्यस्यामिति मतुपि श्रीमच्छब्दस्य कृत्तद्धितसमासाश्च इति प्रातिपदिकसंज्ञायां कृतायां प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे श्रीमत्+स् इति स्थितौ-

६०. उगिदचां सर्वनामस्थानेऽधातोः(७।१।७०)

अच् इत्यनेन अञ्चु इति नलोपिनो धातोर्ग्रहणम् । इदितः इत्यतो नुमित्यनुवर्त्तते । उक् इत् येषान्ते उगितः तथा चायमर्थः अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे । उपधादीर्घ : । श्रीमान् । एवम् औ जस्, अम्, औडिति सर्वनामस्थाने नुम्। हलादौ जश्त्वम् अजादौ च वर्णसम्मेलनर्मिति इयं रूपतालिका-

श्रीमान्	श्रीमन्तौ	श्रीमन्तः
श्रीमन्तम्	श्रीमन्तौ	श्रीमतः
श्रीमता	श्रीमद्भ्याम्	श्रीमद्भिः
श्रीमते	श्रीमद्भ्याम्	श्रीमद्भ्यः
श्रीमतः	श्रीमद्भ्याम्	श्रीमद्भ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमत:	श्रीमतो:	श्रीमताम्
श्रीमति	श्रीमतो:	श्रीमत्सु
हे श्रीमन् !	हे श्रीमन्तौ !	हे श्रीमन्त:!

एवम्-मतिमत्-शक्तिमत्-क्षतिमत्-भूतिमत्-घटवत्-पटवत्-विद्यावत्-बुद्धिमत्-धनवत्-बलवत्-हनुमत्-श्रद्धावत्- आदयोऽपि शब्दा बोध्या: ।

कृतद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां सौ विभक्तौ विद्यार्थिन्+सु इति जाते -

६१. सौ च (६।४।१३)

पूर्वसूत्रादिन्नादयोऽनुवर्त्तन्ते । ढ्रलोपे इत्यतो दीर्घ इति नोपधाया इत्यतश्च उपधाया इति च । तेनायमर्थ: इन्नादीनामुपधाया दीर्घ: स्यात् असम्बुद्धौ सौ परे । सलोपे नलोपे च विद्यार्थी इति । इत : परासु अजादिविभक्तिषु वर्णसम्मेलने हलादिषु च नलोपे रूपाणि सिद्ध्यन्ति । सम्वोधने तु-

६२. न ङिसम्बुद्ध्यो:

(८।२।८) । नलोप : प्रातिपदिकान्तस्य इत्यतो नलोप इत्यनुवर्त्तते । नस्य लोपो न स्यात् ङौ सम्बुद्धौ च । हे विद्यार्थिन् ! हे विद्यार्थिनौ ! हे विद्यार्थिन : ! इयमस्य रूपतालिका-

विद्यार्थी	विद्यार्थिनौ	विद्यार्थिन:
विद्यार्थिनम्	विद्यार्थिनौ	विद्यार्थिन:
विद्यार्थिना	विद्यार्थिभ्याम्	विद्यार्थिभि:
विद्यार्थिने	विद्यार्थिभ्याम्	विद्यार्थिभ्य:
विद्यार्थिन:	विद्यार्थिभ्याम	विद्यार्थिभ्य:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यार्थिनः	विद्यार्थिनोः	विद्यार्थिनाम्
विद्यार्थिनि	विद्यार्थिनोः	विद्यार्थिषु
हे विद्यार्थिन् !	हे विद्यार्थिनौ !	हे विद्यार्थिनः !

एवम् -

गुणिन् ,शशिन् ,दण्डिन् ,कुशलिन् , स्वामिन् , शिखरिन, करिन् , मन्त्रिन्, पक्षिन, कृतिन् , वनवासिन् आदयः शब्दाः ।

राजा । राजानौ । राजानः । सम्बुद्धौ हे राजन् इति हे विद्यार्थिन् इतिवत् । राजानम् । राजानौ । राजन्+अस् इति स्थिते-

६३.यचि भम् (१।४।१८)

य् च अच्चेति समाहारद्धन्दः । सौत्रत्वान्न टच् । स्वादिष्वसर्वनामस्थाने इत्यनुवर्त्तते । तच्च यचीत्यस्य विशेष्यं भवति । तदादिविधिः। अयमर्थः यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्यानेषु परतः पूर्वं भसंज्ञं स्यात् । इति राजन् इत्यस्य भत्वे

६४. अल्लोपोऽनः (६।४।१३४)

अत् लोपः अन इति पदच्छेदः । अत् इति लुप्तषष्ठीकम् । अदित्यत्र तपरकरणं नञ्समासभ्रमवारणार्थम् । अन इत्यवयवे षष्ठी । भस्येत्यनेनाक्षिप्तः प्रत्ययबिशेषः अङ्गस्येति च द्वयमनो विशेषणम् अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याऽकारस्य लोपः स्यात्। इत्यल्लोपः । श्चुत्वम् । जञोर्ज्ञः । राज्ञः। राज्ञा । नलोपस्यासिद्धत्वादात्वमेत्वमैस्त्वं च न भवति । राजभ्याम् । राजभिरित्यादिः । राजन्+इ (ङि) इति स्थितौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६५. विभाषा ङिश्योः (६/१/१३६)

अल्लोपोऽन' इत्यनुवर्त्तते । 'अङ्गस्य' 'भस्य' इति द्वयमप्यधिकृतम् अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । राज्ञि । राजनि । एवमियं रूपतालिका—

राजा	राजानौ	राजानः	एवम्
राजानम्	राजानौ	राज्ञः	महिमन्—प्रतिदिवन्—
राज्ञा	राजभ्याम्	राजभिः	गरिमन्—
राज्ञे	राजभ्याम्	राजभ्यः	मधुरिमन्—लघिमन्
राज्ञः	राजभ्यांम्	राजभ्यः	इत्येवमादयः।
राज्ञः	राज्ञोः	राज्ञाम्	
राज्ञि-राजनि	राज्ञोः	राजसु	
हे राजन्	हे राजानौ	हे राजानः !	

युवा । युवानौ । युवानः । युवानम् । युवानौ इति राजन्शब्दवत् । शसि, युवन्+अस् इति जाते –

६६. श्वयुवमघोनामतद्धिते (६/४/१३३)

अन इत्यनुवृत्तं श्वयुवमघोनां विशेषणम् । भस्येत्यधिकृतम् । वसोः सम्प्रसारणमित्यतः सम्प्रसारणपदञ्चानुवर्त्तते – अन्नन्तानां भसंज्ञकानामेषाभतद्धिते परे सम्प्रसारणं स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६७. न सम्प्रसारणे सम्प्रसारणम् (६/१/३७)

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात् । अत एव ज्ञापकात् अन्तस्य यणः पूर्वं सम्प्रसारणम् । पूर्वरूपम् । तेन यु+उ+अन् इति जाते युघटकयकारस्यापि सम्प्रसारणे प्राप्ते प्रकृतसूत्रेण निषेधे सवर्णदीर्घादिकार्ये यून् इति । यूना । युवभ्यामित्यादि राजवत् । सप्तम्येकवचने तु यूनि इत्येव ।

एवमियं तालिका रूपाणाम् –

युवा	युवानौ	युवानः
युवानम्	युवानौ	यूनः
यूना	युवभ्याम्	युवभिः
यूने	युवभ्याम्	युवभ्यः
यूनः	यूनोः	यूनाम्
यूनि	यूनोः	युवसु
हे युवन्	हे युवानौ	हे युवानः ।

एवम् – श्वन्मघवन्शब्दौ एतदन्ये च राजन् शब्दवद् बोध्याः।

=०=

अभ्यासः

प्रश्नाः

१. उगिदचाम् 'सौच' न ङिसम्बुद्धयोः' इत्येभिः किं निमित्तीकृत्य किं विधीयते?

२. बुद्धिमत् शब्दस्य गुणिन्शब्दस्य च रूपतालिका लेख्या

३. राज्ञः, युवा इतीमौ साधनीयौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. कस्य किं कार्यं भवति ? मेलयत

क. राजन्+अस् इत्यत्र राजन् इत्यस्य – क. सम्प्रसारणम्

ख. राजन+अस् इत्यत्र अनोऽकारस्य– ख. विभाषया लोपः ।

ग. ङिश्योः परयोरनोऽकारस्य– ग. भसंज्ञा ।

घ. अन्नन्तानां भसंज्ञाकानामतद्धिते परे– घ. सम्प्रसारणाभावः।

ङ. सम्प्रसारणे परतः पूर्वस्य यणः– ङ. नित्यं लोपः।

सर्वनामशब्दाः

तद्शब्दात् अर्थवदिति प्रातिपदिकसंज्ञायां कृतायां प्रथमाया एकवचने सौ विभक्तौ अनुबन्धलोपे तद्+स् इत्यवस्थायाम्-

६८. त्यदादीनामः (७।१।१०२)

एषामकारान्तादेशः स्यात् विभक्तौ । अलोऽन्त्यबलेन दकारस्य अकारः ।

६९. तदोः सः सावनन्त्ययोः(६।२।१०६)

त्यदादीनाम् इत्यनुवर्त्तते ।

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ परे । सस्य रुत्वे विसर्गे च-सः । तौ । ते । तद्+ङे इति जाते

७०. सर्वनाम्नः स्मै (७/१/१४)

अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात् । तस्मै।

७१. ङसिङ्योः स्मात्स्मिनौ(७/१/१५)

अतःसर्वनाम्नो ङसिङ्यो : स्मातस्मिनौ स्तः । तस्मात् । तस्माद् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७२. आमि सर्वनाम्न : सुट् (७/१/५२)

अवर्णान्तात् परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । एत्वषत् तेषाम् । तस्मिन् । शेषं रामवत् । त्यदादीनां सम्बोधनं न भवति प्रायेण इयमस्

रूपतालिका -

पुंसि	स्त्रियाम्	नपुंसके
स, तौ, ते	सा,ते, ताः	तत्/तद्, ते, तानि
तम्, तौ, तान्	ताम् , ते, ताः	“ “ “ “
तेन, ताभ्याम्, तैः,	तया, ताभ्याम्, ताभिः	तेन, ताभ्याम्, तैः
तस्मै, “ तेभ्यः	तस्यै, ताभ्याम्, ताभ्यः	तस्मै, “ , तेभ्यः
तस्मात्/द्, “ तेभ्यः	तस्याः, “, “	तस्मात्/द् “ ,“
तस्य, तयोः , तेषाम्	“, तयोः, तासाम्	तस्य,तयोः, तेषाम्
तस्मिन्,तयोः, तेषु	तस्याम्,“ , तासु	तस्मिन्, “ , तेषु

तच्छब्दस्य स्त्रियां चतुर्थीतः सप्तमीपर्यन्तमेकवचने इदं सूत्रं प्रवर्त्तते

७३. सर्वनाम्नः स्याड्ढ्रस्वश्च (७।३।१४)

आवन्तात् सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः इत्यर्थोऽस्य अन्यत् सीताशब्दोक्तं बोध्यम् ।

इदम् शब्दस्य अर्थवदिति प्रातिपदिकसंज्ञायां कृतायां प्रथमाया एकवचने सौ अनुबन्धलोपे इदम्+स् इति स्थितौ ।

७४ इदमो मः (७।२।१०८)

तदोरित्यतः सौ इत्यनुवर्त्तते इदमो मः स्यात् सौ परे । त्यदाद्यत्वापवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७५. इदोऽय् पुंसि (७।३।१११०)

इदम् इत्यनुर्क्तते । अवयवे षष्ठी । इदम इदोऽयस्यात् सौ पुंसि । सोर्लोपः। अयम् इद+औ इति स्थिते

७६. दश्च (७।२।१०९)

इदमो दस्य 'मः स्यात् विभक्तौ । इमौ ।

७७. जसः शी (६।१।१७)

अदन्तात् सर्वनाम्नः परस्य जसः शी स्यात् । इमे।

७८. अनाप्यकः (७।२।११२)

अककारस्येदम इदोऽन् स्यादापि विभक्तौ । अनेन ।

७९. हलि लोपः (६।२।११३०)

अककारस्येदम इदो लोपः स्यात् आपि हलादौ । आभ्याम् । अन्यत् तद्वत्। स्त्रियान्तु इदम्+सु इति स्थिते

८०. यः सौ (७।२।११०)

इदमो म इति सूत्रात् इति दश्चः इत्यतश्च द इति चानुवर्त्तते इदमो यः स्यात् सौ । इयम् । इदम् + औ इत्यत्र त्यदाद्यत्वे टापि मत्वे च इमे इति । अन्यत् पुंवत् स्त्रीलिङ्गतच्छब्दवच्च ज्ञेयम् । नपुंसके तु स्वमोर्लुग् भवति, अन्यत्र ज्ञानवत् ततोऽन्यत्र च पुंवद् बोध्यम् ।

इयम् रूपतालिका -

पुंसि -	स्त्रियाम्-	नपुंसके-
अयम्, इमौ, इमे ।	इयम्,इमे ,इमाः।	इदम्,इमे, इमानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमम्,इमौ,इमान् ।	इमाम्,इमे ,इमाः ।	इदम्,इमे, इमानि ।
अनेन , आभ्याम,एभिः।	अनया,आभ्याम्,आभिः।	अनेन, आभ्याम्,एभिः।
अस्मै, आभ्याम्,एभ्यः।	अस्यै, आभ्याम्,आभ्यः।	अस्मै- आभ्याम्,एभ्यः।
अस्मात्,आभ्याम्,एभ्यः।	अस्याः,आभ्याम्,आभ्यः।	अस्मात्- आभ्याम्,एभ्यः।
अस्य,अनयोः, एषाम ।	अस्याः,अनयोः, आसाम् ।	अस्य,अनयोः एषाम्।
आस्मिन्- अनयोः ,एषु ।	अस्याम्,अनयोः , आसु ।	अस्मिन्,अनयोः, एषु।

अभ्यासः

प्रश्नाः

१. केन किं विधीयते ? स्वगिरा लिखत

क. त्यदादीनामः । ख. तदोः सः सावनन्त्ययोः । ग. सर्वनाम्नः स्मै ।

घ. आमि सर्वनाम्नः सुट् । ङ. इदोऽय् पुंसि ।

२. सः, तस्यै, अयम् एतान् प्रयोगान् साधयत

३. किं रूपं कस्यां विभक्तौ सिद्धं भवति मेलयत

क. सः	क. सुप्
ख. तैः	ख. आम्
ग. तस्मै	ग. ओस्
घ. तेषाम्	घ. भिस्
ङ तयोः	ङ. सु
च. तेषु	च. ङे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. तत्शब्दस्य स्त्रियां रूपतालिकां लिखत

५. कस्मिन् लिङ्गे कस्यां विभक्तौ इदंशब्दस्येमानि रूपाणि ? मेलयत

क. पुल्लिङ्गे जसि	क. एषाम् ।
ख. नपुंसके शसि	ख. अस्याम्
ग. स्त्रियां टाविभक्तौ	ग. अस्मै
घ. नपुंसके ङेविभक्तौ	घ. अनया
ङ. स्त्रियां ङिविभक्तौ	ङ. इमे
च. पुंसि आमि	च. इमानि

६. केन किं विधीयते लिखत

क. इदमो मः । ख. दश्च । ग. जसः शी । घ. हलि लोपः । ङ. यः सौ ।

=o=

युष्मदस्मच्छब्दौ -

युष्मदस्मच्छब्दौ त्रिष्वपि लिङ्गेषु समानरुपौ, लिङ्गविषेशद्योतकानां प्रत्ययानामनुत्पत्तेः अलिङ्गे युष्मदस्मदी इत्यस्य तु पदान्तरसन्निधानमन्तरा युष्मदस्मद्भ्यां लिङ्गप्रतीतिर्न भवतीत्यर्थ : ।

एवञ्च युष्मदस्मदछब्दयोरर्थवदिति प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे युष्मद्+स् , अस्मद्+स् इति स्थितौ ।

८१.ङेप्रथमयोरम्(७/१/२८) युष्मदस्मद्भ्यामित्यनुवर्त्तते युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमाद्वितीययोश्चामादेशः स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८२. त्वाहौ सौ (७२।९४)

युष्मदस्मदोरित्यनुवर्त्तते । मपर्यन्तस्य इत्यधिकृतम् । युष्मदस्मदोर्मपर्यन्तस्य अह, इत्येतौ आदेशौ स्तः सौ परे ।

८३. शेषे लोपः (७२।९०)

शेषे इत्यत्र स्थानिनोऽधिकरणत्वविवक्षा । अतः सप्तम्यन्तत्वेऽपि बस्तुतस्त षष्ठ्यर्थत्वम् तेन-मपर्यन्ताच्छेषस्य लोपः स्यादित्यर्थः । त्व +अद्+अम्, अह अद्+ अम् इति स्थितौ टिलोपे पूर्व-रूपम् । त्वम् । अहम् ।

८४. युवावौ द्विवचने(७२।९२)

युष्मदस्मदोरित्यनुवर्त्तते । मपर्यन्तस्येत्यधिकृतम् ।

अष्टन आ विभक्तौ इत्यतोविभक्तौइति द्वित्वविशिष्टार्थप्रतिपादनसमर्थयोःयुष्मदंस्मदोर्मपर्यन्तस्य युवावौ स्तो विभ अमादेशः। आत्वम् । सवर्णदीर्धः । पूर्वरूपम् । युवाम् । आवाम् ।

८५. यूयवयौ जसि (७२।९३)

जसि मपर्यन्तस्य यूयवयौ स्तः । जसोऽमादेशेऽस्य प्रवृत्तौ टिलोपः । यूयम् । वयम्

८६. त्वमावेकवचने (७२।९७)

एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ।

८७. द्वितीयायाञ्च (६।२।८७)

युष्मदस्मदोराकारः स्यात् । त्वाम् ।माम् । युवाम् । आवाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८८. शसो न (७|१|२९)

नेत्यविभक्तिकं रूपम् । युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् । अमोऽपवादः । आदेः परस्य । संयोगान्तलोपः । युष्मान् । अस्मान् ।

८९. योऽचि (७|२|८७)

अनादेशे इत्यनुवर्त्तते । अनयोर्यकारादेशः स्यात् अनादेशेऽजादौ परतः । त्वया । मया ।

९०. युष्मदस्मदोरनादेशे (७|२|८७)

विभक्तौ इति, हलि इति च पूर्वसूत्राभ्यामनुवर्त्तते । अनयोराकारादेशः स्यात् हलादौ विभक्तौ । युवाभ्याम्। आवाभ्याम् । युष्माभिः । अस्माभिः ।

९१. तुभ्यमह्यौ ङयि (७|२|९५)

अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि । अमादेशः । शेषे लोपः । तुभ्यम् । मह्यम्।

९२. भ्यसोऽभ्यम् (७|१|३०)

युष्मदस्मद्भ्यां परस्य भ्यसोऽभ्यमादेशः स्यात्। युष्मभ्यम् । अस्मभ्यम् ।

९३. एकवचनस्य च (७|१|३२)

अदित्यनुवर्त्तते । आभ्यां पञ्चम्येकवचनस्य अत् स्यात् । त्वत् । मत् । युवाभ्याम् । आवाभ्याम् ।

९४. पञ्चम्या अत् (७|१|३१)

भ्यस इत्यनुवर्त्तते । आभ्याम् पञ्चम्या भ्यसोऽत् स्यात् । युष्मत् । अस्मत्।

९५. तवममौ ङसि (७|२|९६)

अनयोर्मपर्यन्तस्य तवममौ स्तौ ङसि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९६. युष्मदस्मद्भ्यां ङसोऽश् (७।१।२७)

आभ्यां परस्य ङसोऽशादेशः स्यात् । तव । मम । युवयोः । आवयोः । युष्मद्+आम्, अस्मद्+आम् इति स्थिते ।

९७. साम आकम् (७।१।३३) युष्मदस्मद्भ्यामित्यनुवर्त्तते । परस्येत्यधिकृतम् । आभ्यां परस्य साम आकम् स्यात् । आमि साम्त्व[1]बुद्ध्याऽनेनाकमादेशे शेषे लोपः इति टिलोपे वर्णसम्मेलने सिद्धं रूपम् । युष्माकम् । अस्माकम् । त्वयि । मयि । युवयोः। आवयोः । युष्मासु । अस्मासु । इदं शब्दद्वयस्यापि रूपसङ्कलनम्-

त्वम्,युवाम्, यूयम् ।	अहम् , आवाम, वयम् ।
त्वाम्,युवाम्, युष्मान् ।	माम् ,आवाम् ,अस्मान् ।
त्वया,युवाभ्याम्,युष्माभिः ।	मया, आवाभ्याम् ,अस्माभिः।
तुभ्यम,युवाभ्याम्,,युष्मभ्यम् ।	मह्यम,आवाभ्याम्, अस्मभ्यम्।
त्वत्,युवाम्याम्,युष्मत् ।	मत् , आवाभ्यम् ,अस्मत् ।
तव, युक्योः, युष्माकम् ।	मम, आवयोः,अस्माकम् ।
त्वयि, युवयोः, युष्मासु ।	मयि, आवयोः, अस्मासु ।

एक - द्वि ~ त्रि-चतुश्शब्दानां रूपतालिका, तत्प्रयोगप्रकारश्च ।

एकशब्दः संख्यायां नित्यैकवचनान्तः । संख्येयान्यपि पदानि प्रत्तानि । अनुकूलं क्रियापदं देयम् ।

एकशब्दस्य पुंल्लिङ्गे-	स्त्रीलिङ्गे-	नपुंसके-
एकः बालकः	एका बालिका	एकम फलम्
एकम् बालकम्	एकाम् बालिकाम्	एकम् फलम्

१.आहार्यज्ञानेन आमि साम्त्वबुद्धिः । आहार्यज्ञानञ्च बाधकालिकमिच्छाजन्यं ज्ञानम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकेन बालकेन एकया बालिकया एकेन फलेन

एकस्मै बालकाय एकस्यै बालिकायै एकस्मै फलाय

एकस्मात् बालकात् एकस्याः बालिकायाः एकस्मात् फलात्

एकस्य बालकस्य एकस्याः बालिकायाः एकस्य फलस्य

एकस्मिन् बालके एकस्यां बालिकायाम् एकस्मिन् फले। इति।

द्विशब्दोऽपि संख्यायां नित्यं द्विबचनान्तः।

तत्र पुल्लिङ्गे स्त्रीलिङ्गे

द्वौ बालकौ द्वे बालिके

द्वौ बालकौ द्वे बालिके

द्वाभ्याम् बालकाभ्याम् द्वाभ्याम् बालिकाभ्याम्

द्वाभ्याम् बालकाभ्याम् द्वाभ्याम् बालिकाभ्याम

द्वाभ्याम् बालकाभ्याम् द्वाभ्याम् बालिकाभ्याम्

द्वयोः बालकयोः द्वयोः बालिकयोः

द्वयोः बालकयोः द्वयोः बालिकयो

नपुंसके -स्त्रीलिङ्गसदृशानि रूपाणि साधनप्रकारस्तु भिन्नः। शिक्षकैः शिक्षणीया साधनिका।

त्रिशब्दो लिङ्गत्रयेऽपि नित्यं बहुवचनान्तः। तत्र पुंल्लिङ्गादिक्रमेण इमानि रूपाणि -

त्रयः बालकाः तिस्रः वालिकाः त्रीणि फलानि।

त्रीन् बालकान् तिस्रः वालिकाः त्रीणि फलानि।

त्रिभिः वालकैः तिसृभिः वालिकाभिः त्रिभिः फलैः।

त्रिभ्यः वालकेभ्यः तिसृभ्यः वालिकाभ्यः त्रिभ्यः फलेभ्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिभ्यः बालकेभ्यः	तिसृभ्यः बालिकाभ्यः	त्रिभ्यःफलेभ्यः।
त्रयाणाम् बालकानाम्	तिसृणाम् बालिकानाम्	त्रयाणाम् फलानाम्
त्रिषु बालकेषु	तिसृषु बालिकासु	त्रिषु फलेषु ।

चतुश्शब्दोऽपि नित्यं बहुवचनान्तः इमानि लिङ्गत्रयेऽपि रूपाणि -

चत्वारः बालकाः	चतस्रः बालिकाः	चत्वारि फलानि
चतुरः बालकान्	चतस्रः बालिकाः	चत्वारि फलानि
चतुर्भिः बालकैः	चतसृभिः बालिकाभिः	चतुर्भिः फलैः
चतुर्भ्यः बालकेभ्यः	चतसृभ्यः बालिकाभ्यः	चतुर्भ्यः फलेभ्यः
चतुर्भ्यः बालकेभ्यः	चतसृभ्यः बालिकाभ्यः	चतुर्भ्यः फलेभ्यः
चतुर्णां बालकानाम्	चतसृणाम् बालिकानाम्	चतुर्णाम् फलानाम्
चतुर्षु बालकेषु	चतसृषु बालिकासु	चतुर्षु फलेषु

एवमेषां संख्येयान्तरैः सह प्रयोगप्रकारश्शिक्षणीयोऽभ्यसनीयश्च ।

=0=

अभ्यासः

प्रश्नाः

१. युष्मदस्मच्छब्दस्य केन प्रातिपदिकसंज्ञा ? किञ्च तस्याः फलम् ?

२. ङेप्रथमयोरम् इत्यनेन कतिस्वादीनाममादेशो भवति कानि च तानि रूपाणि?

३. यूयम्, अस्मान्, अस्माकम् इति रूपत्रयं साधयत ।

४. प्रकृतिप्रत्ययौ विश्लेषयत -

अहम्, युष्मान्, अस्मभ्यम्, युष्मत्, अस्माकम्, त्वयि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. केन किं विधीयते ? मेलयत -

क. साम आकम् क. युवावादेशौ

ख. युष्मदस्मद्भ्यां ङसोऽश् ख. अतादेशः

ग. एकवचनस्य ग. आत्वम्

घ. युवावौ द्विवचने घ. आकमादेशः

ङ. द्वितीयायाञ्च ङ. अशादेशः

६. योऽचि इत्यस्यार्थं लिखित्वा लक्ष्ये सङ्घटयत ।

७. राम-ज्ञान-गौरीशब्दान् विशेष्यान् विधाय एक-द्वि-त्रि-चतुश्शब्दानां प्रयोगान् विधत्त ।

=o=

हलन्तस्त्रीलिङ्गम्

हलन्तस्त्रीलिङ्गो वाच्शब्दः। वाण्यर्थकस्य तस्य कृत्तद्धितेति प्रातिपदिकत्वात् सौ अनुबन्धलोपे पदत्वादिकार्ये हल्ङ्यादिना सलोपे चोः कुरिति कुत्वेन ककारे , जश्त्वे, वैकल्पिके चर्त्वे च सिद्धं रूपं वाक् वागिति। अजादिषु विभक्तिषु वर्णसम्मेलनम्,। हलादौ च कुत्वे जश्त्वे च रूपाणि सिद्ध्यन्ति । इयं तालिका ।

वाक् ,वाग्	वाचौ	वाचः
वाचम्	वाचौ	वाचः
वाचा	वाग्भ्याम्	वाग्भिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाचे	वाग्भ्याम्	वाग्भ्यः
वाचः	वाग्भ्याम्	वाग्भ्यः
वाचः	वाचोः	वाचाम्
वाचि	वाचोः	वाक्षु

वाक्षु इत्यत्र वाच्+सु इति स्थिते कुत्वम, पत्वम संयोगे क्षत्वञ्च बोध्यम्

एवम् -

स्रज,शुच् , त्वच्, रुच्, सरित् , हरित्, योपित् ,तडित् , बिपद् , सम्पदादयः

=o=

अभ्यासः

प्रश्नाः

१. वाक्, वाग्भ्याम् इतीमौ साधयत ।

२. स्रज्-त्वच्छब्दयोः रूपतालिकां लिखत ।

३. सरित्-योपित्शब्दयोः भ्यामि आमि च रूपं लिखत ।

=o=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तमपाठः

तसिल्त्रल्दादिप्रत्यानां प्रयोगव्यापारशिक्षणम्

सर्वनामशब्देभ्यः तसिलादयो भवन्ति । तसिलाद्यन्ताश्चाव्यया भवन्ति तद्धितश्चासर्वविभक्तिः (१।१।३८)

इत्याद्यव्ययत्वविधायकसूत्रप्रवृतेः । सर्वादयश्च सर्व, विश्व, उभ , उभय, डतरडतमप्रत्ययान्तौ, अन्यतर, इतर त्वत् त्व, नेम,सम, सिम, पूर्व, पर, अवर, दक्षिण,उत्तर, अपर, अधर,स्व,अन्तर, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक द्वि, युष्मद्, अस्मद्, भवतु, किम् इति पञ्चत्रिंशत् । तत्र किंशब्दात् द्वियुष्मदस्मद्भवत्वतिरिक्तेभ्यः सर्वनामशब्देभ्यो बहुशब्दाच्च तसिलादयो भवन्ति ।
किं-सर्वनामबहुभ्योऽद्व्यादिभ्यः (५।३।२)

इत्यधिकारात् । तत्रापि बाहुल्येन प्रयोगपथमागतेभ्य एव प्रत्ययाः प्रदर्श्यन्ते । तत्र च निम्नलिखितानि प्रमुखाणि सूत्राणि तत्तत्प्रत्ययविधायकानि अवधेयानि । तेषां प्रत्ययानां विभक्तिसंज्ञाविधायकमादेशविधायकञ्च सूत्रं निम्नलिखितमवधेयम् ।

१ प्राग्दिशो विभक्ति :(५।३।१)

दिक्शब्देभ्यः इत्यतः प्राग् वक्षमाणाः प्रत्यया विभक्तिसंज्ञकाः स्युः । तेन त्यदाद्यत्वादिकं भवति ।

२. इदम इश् (५।३।३) स्पष्टोऽर्थः ।

३. सर्वस्य सोऽन्यतरस्यां दि (५।३।६) प्राग्दिशीये दकारादौ प्रत्यये परे सर्वशब्दस्य सो वा स्यात ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. पञ्चम्यास्तसिल् (५।३।७)

पञ्चम्यन्तेभ्यः किमादिभ्यः तसिल् स्याद्वा

५. कु तिहोः (७२।१०४)

किमः कुः स्यात् तादौ हादौ च प्राग्दिशीये परे। कुतः, यतः, ततः, इतः, अतः, अमुतः ।

६. सप्तम्यास्त्रल् (५।३।१०)

सप्तम्यन्तात् त्रल् प्रत्ययः स्यात् । इदमो हः यत्र, तत्र, कुत्र, इह ।

७. किमोऽत् (५/३/१२)

सप्तम्यन्ताद् किमोऽद् वा स्यात्

८. क्वाति (७२।१०५)

किमः क्वादेशः स्यादाति । क्व । कुत्र ।

९. सर्वैकान्यकिंयत्तदः काले दा (५।३।१५)

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् । सदा । सर्वदा । एकदा । यदा। कदा

१०. अधुना (५।३।१७).

इदमः सप्तम्यन्तात् कालद्वाचिनः स्वार्थेऽधुना प्रत्ययः स्यात् । अधुना ।

११. दानीं च (५।३।१८) स्पष्टोऽर्थः । इदानीम् ।

१२. प्रकारवचने थाल् (५।३।२३)

प्रकारवृत्तिभ्यः किमादिभ्यः स्थाल् स्यात् स्वार्थे । तथा । यथा ।

१३. इदमस्थमुः (५।३।२४) इदमःथमु प्रत्ययः स्यात् प्रकारवचने । इत्थम् ।

१४. किमश्च (५।३।२५) थमुः स्यात् । कथम् ।

एवञ्चायं प्रयोगप्रकारस्तसिलाद्यन्तानां सर्वनामशब्दानाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्व+तसिल् - सर्वतः समागच्छन्ति जनाः । सर्वतः सारमादद्यात् । सर्वतः कृष्णं गोपाः ।

सर्वतः पाणिपादन्तत् सर्वतोऽक्षिशिरोमुखम् ।

सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ गीता

सर्व+त्रल् - सर्वत्र कोलाहलो वर्त्तते । दध्नि सर्वत्र घृतम् ।

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।

ग्रहपीडासु चोग्रासु माहात्म्यं श्रृणुयान्मम ॥ दुर्गा सप्तशती ।

सर्व+दा - छात्रैः सर्वदा अध्ययने प्रवृतिः कार्या । विद्याभ्यासः सर्वदैव हितावहः।

तेन योगनिधे धीमन् ! श्रोतव्या सा प्रयन्नतः ।

दिनानां नियमो नास्ति सर्वदा श्रवणं मतम् ॥ भा. मा.

सदा ध्येयं सदा गेयं भगवच्चरितामृतम् ।

उभय+ तसिल्- उभयतः कृष्णं गोपाः । उभयतः पाशा रज्जुः ।

उभय+त्रल् - उभयत्र वीराः कुरुपाण्डवयोः । उभयत्र हस्तयोर्मोदकानि ।

एकभागे ऋषिगणस्तदन्यत्र दिवौकसः ।

वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ॥

इतर+तसिल्, त्रल्- तदितरतो विरोध आगतः । आलस्यादितरत्र समुद्योगो लक्ष्मीश्च ।

यद्+त्रल्, तद्+त्रल्–यत्र परिश्रमो भवति तत्रोत्तीर्णताऽपि भवति । यत्रोद्योगस्तत्र सफलता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम" ॥ गीता

यत्र भागवती वार्त्ता तत्र भक्त्यादिकं व्रजेत् । (भा. मा.)

यद् तद्+तसिल् – यतस्त्वमागच्छसि ततः सोऽपि ।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्" ॥ – गीता ।

यद् तद्+दा–यदा यदा पठने शैथिल्यन्तदा तदा अनुत्तीर्णता । यदा र अनुद्योगस्तदा दारिद्र्यम् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" ॥ - गीता (४–७)

यद् तद्+थाल् –ये यथा बालान् व्यवहरन्ति तेऽपि ताँस्तथैव । "ये यथा प्रपद्यन्ते ताँस्तथैव भजाम्यहम्" ।

"वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा –
न्यन्यानि संयाति नवानि देही" ॥ गीता (२ २२)

एतद्+तसिल्- स रोगमुपेक्षितवान् । अतः स असमय एव निधनङ्गतवान् । अत च स्वास्थ्यरक्षायै सञ्चेष्टन्ते सुकर्माणि कर्त्तुम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतद्+थमु-इत्थं प्रतिपादयन्ति शास्त्राणि । इत्थं कार्याणि कुर्वीत ।

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।

तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ - दुर्गा सप्तशती ।

इद्म+तसिल्- इतो गच्छन्ति सर्वेऽपि । इतस्ततो भ्रमन्ति प्रहरिणः ।

इदम्+ह- इह देशे सन्ति अधिकाः पर्वताः । इह संसारे न किमपि वास्तविकं सुखम् ।

य इदं श्रृणुयान्नित्यं यश्चापि परिकीर्त्तयेत् ।

नाशुभं प्राप्नुयात्किञ्चित् सोऽमुत्रेह च मानवः ॥ - विष्णु सहस्रनाम।

इदम् +अधुना- अधुनापि नेपालस्य अनेकेषु जनपदेषु मोटरयानं न प्राप्तम्। अधुना विकसितदेशवासिनो हिमालयमारोढुं नेपाले समायान्ति ।

इदम्+दानीम्- इदानीं सन्ति सन्तः कियन्तः । इदानीं नेपाले शान्तिः ।

इदम्+थमु- इत्थं सर्वैर्देशोत्थानाय कठिनश्श्रमः कार्यः । इत्थमभिनयन्ति नर्तकाः ।

एक+तसिल्, त्र- एकत इदं प्रमाणमधिगतम् । एकत्र पक्षपातो दृश्यते ।

"एकत्रापि निरादरो यदि भवेदन्यत्र चेदादरः। "

" वाग्देवी हृदयाम्बुजे लसति चेत्को नाम दिल्लीश्वरः ।"

एक+दा -एकदा अहं महद् वनमुपेतवान् ।

तं एकदा तु मुनयः प्रातर्हुतहुताग्नयः ।

सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥- भा. १ -१-५

किम्+तसिल - कुत आगच्छसि ? कुतः पलायिताश्चौराः ?

किम्+त्रल्, अत्- कुत्र गच्छसि ? क्व सन्ति चौराः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"कुत आगत्य घटते विघट्य क्व नु याति वा ।
न लक्ष्यते गतिः सम्यक् धनस्य च घनस्य च ॥"

"क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् ।
ब्रह्मरातो विचार्यैवं तदा देवान् जहास ह ॥"

किम्+दा, र्हिल्- कदा गच्छसि ? कर्हि चागमिष्यसि ?

किम्+थमु- कथं हिमालयारोहणं कुर्वन्ति । कथं चन्द्रलोकं गच्छन्ति ।

कथं ब्रह्मन् दीनमुखः कुतश्चिन्तातुरो भवान् ।
त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥ - भा.

कथं भीष्ममहं संख्ये द्रोणञ्च मधुसूदन !
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ! - गीता ।

अदस् + तसिल्, त्र- अमुतो दलात् तत्सदस्याः पृथग्भूताः । अमुत्र दण्डाशङ्कया न गच्छति सः ।

पार्थः नैवेह नामुत्र विनाशस्तस्य विद्यते ।
नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति ॥ - गीता ।

पूर्वपरादिष्वपि उक्ताः प्रत्यया यथाशास्त्रं प्रयोक्तव्याः ।

अभ्यासः

प्रश्नाः

१. तसिलादयः प्रत्ययाः कीदृशेभ्यश्शब्देभ्यो भवन्ति ?

२. तसिलादिप्रत्ययान्तानां रूपाणि अव्ययानि सव्ययानि वा ?

३. सर्वादयः कति ? केभ्यश्च तेभ्यस्तसिलादयो न भवन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. तसिलादीनां विभक्तित्वे कानि प्रयोजनानि ?

५. सर्वत्र, अन्यत्र, यदा कदा शब्दानां वाक्ये प्रयोगं कुरुत ।

६. एकदा, कुतः , अधुना, कथंशब्दानां प्रयोगप्रकारं दर्शयत ।

७ सम्बद्धान् परस्परं मेलयत-

क.यत्र	क. तर्हि
ख. यदा	ख. तत्र
ग. यथा	ग. ततः
घ. यतः	घ. तदा
ङ. यर्हि	ङ. तथा

८. कस्मात् कः प्रत्ययः ? परस्परं मेलयत-

क. पञ्चम्यन्तात् किंशब्दात्	क. दाप्रत्ययः
ख. तृतीयान्तात् किंशब्दात्	ख. अधुनाप्रत्ययः
ग. सर्वैकान्यकिंयत्तदः	ग. थाल्प्रत्ययः
घ. सप्तम्यन्तादिदमः	घ. तसिल्प्रत्ययः
ङ. प्रकारवृतिभ्यो यदादिभ्यः	ङ. थमुप्रत्ययः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याकरणप्रवेशिका

(द्वितीयभागः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तावना

अन्येभ्यो विश्वविद्यालयेभ्य आगता अपि संस्कृत जिज्ञासवश्छात्राः सरलतयाऽस्मिन् विश्वविद्यालये प्रवेशं कुर्वन्तु , सुन्दरस्वरूपं संस्कृतवाङ्मयोदधिगर्भस्थं ज्ञानपीयूषं रसयित्वा सुहिता भवन्त्विति वान्छता महेन्द्र संस्कृतविश्वविद्यालयेनाऽयं भाषाप्रशिक्षण कार्यक्रम प्रारब्धः, पाठक्रमश्च निर्मितः ।

तस्यैव पाठ्यक्रमस्य (ग) प्रकरणे स्थितं विषय – मधिकृत्यास्या व्यकरणप्रवेशिकाया द्वितीयभागो विरचितः । पाठ्यक्रमानुसारं तत्र केवलं रूपतालिका – निरूपणे निर्दिष्टेऽपि पाणिनीयव्याकरणस्य तिङन्तप्रकरणस्थ परिभाषिक — शब्दानां, विषयवस्तूनां परिचयः प्रमुखसूत्रपरिचयश्चावश्यकोऽपेक्षितश्चेति विचार्यात्र पूर्वं "तिङन्तपरिचयः" इति पाठः प्रत्तः । तत्र च उक्त विषय दिग्दर्शनरूपः परिचयः सामान्येन सरलयाशैल्या प्रस्तुतोऽस्ति ।

किं च सुप्तिङन्तचयो वाक्यमिति प्रसिद्धमेव । वाक्ये सुबन्तपदानि तिङन्तपदानि च भवन्ति । तेषु कतिपयपदानां प्रदर्शनं तच्छिक्षणनिर्देशनं च प्रथमभागे पूर्वेषु पाठेषु विहितम् । पुनश्चास्मिन् द्वितीयभागे वाक्ये प्रधानभूतानां कतिपयतिङन्तपदानां पाठ्यक्रमानुरोधि रूपतालिकाप्रदर्शनं तिङन्तपरिचयानन्तरं दत्तमस्ति ।

यद्यपि पाठक्रमे लट् लृट् लोट् लङ् लकाराणामेव रूपतालिकाशिक्षणं निर्धारितं तथापि विशेषजिज्ञासूनां निर्दशनधिया भ्वादिगणे निर्धारितानां धातूनामवशिष्टेषु लकारेष्वपि रूपाणि प्रत्तानि सन्ति ।

लेखका.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टमः पाठः

<u>तिङन्त परिचयः</u>

१. क्रियावाचकत्वे सति भ्वाद्यादिगणपठितत्वं धातुत्वम् । क्रियावाचिनां भू-पठ्-स्था-पाऽऽदिमूलधातूनां "भूवादयो धातवः १।३।१" इति सूत्रेण धातुसंज्ञा भवति, सन्नन्तयङन्तादिकृत्रिमधातूनां "सनाद्यन्ता धातवः" ३।१।३२ इति सूत्रेण धातुसंज्ञा भवति ।

सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा ।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥

२. मूलधातवः शप्श्यन्नादिविकरणप्रत्ययानुसारेण रूपभेदेन दशगणेषु विभक्ताः सन्ति, ते दश गणाश्च- भ्वादिः , अदादिः , जुहोत्यादिः , दिवादिः , स्वादिः, तुदादिः, रुधादिः, तनादिः, क्र्यादिः चुरादिश्चेति ।

विकरणप्रत्यश्च प्रकृतिप्रत्यययोर्मध्ये यः पतति सः ।

३. "कालं क्रियात्यमकमाहु": इति क्रियायाः कालत्वात् वर्तमानत्वादिकाल - (क्रिया) विशेषे धातुभ्यो लडादयो दश लकाराः भवन्ति । लकारः प्रत्ययः।

(इत्संज्ञालोपदिना लमात्रावशेषित्वाल्लकारत्वम्) ।

ते च दशलकाराः क्रमेण एते सन्ति -
लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् । इति ।

एषु पञ्चमो लेट् लकारः वेदे एव प्रयुज्यते । लिङ्च विध्याद्यर्थे आशिष्यर्थे चेति द्विधाऽस्ति । एवं लोके दशैव लकाराः ।

४. मूलधातवः क्रियापदस्वरूपभेदेन त्रिधा विभक्ताः सन्ति केचन आत्मनेपदिनः केचन उभयपदिनः केचन परस्मैपदिन इति ।

अनुदात्तेत्संज्ञकाः ङकारेत्संज्ञकाश्च धातवः अनुदात्तङित आत्मनेपदम् १।२।५३ इति सूत्रेण आत्मनेपदिनः । आत्मनेपदप्रत्ययवन्तः। भवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरितेत्संज्ञका ञकारेत्संज्ञकाश्च धातव उभयपदिनो भवन्ति । तद्यथा स्वरितञितः कर्त्रभिप्राये क्रियाफले १।३।७२ इति सूत्रेण क्रियाफले कर्तृगामिनि आत्मनेपदिनः क्रियाफले कर्तृभिन्नगामिनि परस्मैपदिनो भवन्ति ।

एतदतिरक्ता धातवः कर्तृवाच्ये एव शेषात्कर्तरि परस्मैपदम् १।३।७८ इति सूत्रेण परस्मैपदिनो भवन्ति ।

कर्मवाच्ये भाववाच्ये च सर्वे धातव आत्मनेपदिन एव भवन्ति ।

५. किञ्च धातवः धात्वर्थफलव्यापाराश्रयत्वदृष्ट्या सकर्मका अकर्मकाश्चेति द्विधा भवन्ति ।

क. फलव्यधिकरण- व्यापारवाचकत्वं सकर्मकत्वम् ।

ख. फलसमानाधिकरण- व्यापारवाचकत्वमकर्मकत्वम् ।

अर्थात्- व्यापारः फलञ्च धातोरर्थौ भवतः व्यापाराश्रयः कर्ता उच्यते, फलाश्रयःकर्म उच्यते, परन्तु-

यदा यस्य धातोरर्थः . व्यापारः कर्तरि तिष्ठति फलञ्च ,कर्तर्येव तिष्ठति तदा तस्य धातोरकर्मकत्वम् । यथा स्वप्धातोः शरीरोत्तानीकरण- शिथिलीकरणरूपोऽर्थः व्यापारः स्वास्थ्यलाभरूपोऽर्थः फलञ्च कर्तर्येव तिष्ठत इति स्वप्धातुरकर्मकः ।

यदा तु धात्वर्थव्यापारः कर्तरि तिष्ठति, फलञ्चान्यत्र तिष्ठति तदा तस्य धातोः सकर्मकत्वम् । यथा-

पच् धातोः चूल्युपरिधारण-फुत्कारादिरूपोऽर्थः व्यापारः कर्तरि तिष्ठति विक्लित्तिरूपोऽर्थः फलञ्च कर्तृभिन्ने तण्डुले तिष्ठति अतः पच् धातुः सकर्मकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं लकाराः (प्रत्ययाः) सकर्मकेभ्यो धातुभ्यः कर्मणि, कर्तरि च भवन्ति, अकर्मकेभ्यो धातुभ्यो भावे कर्तरि च भवन्ति, लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९ इति सूत्रेण , अत्र चकारात् कर्तरि कृत् ३।४।६७ इत्यतः कर्तरीत्यनुकृष्यते।

६. धातु विहितलकारस्य स्थाने तिप् तस् झि, सिप् थस् थ, मिप् बस् मस्, त आताम् झ, थास् आथाम् ध्वम्, इट् वहि महिङ्, एते आदेशा भवन्ति । एतेऽष्टादश प्रत्ययाः तिङ्शब्देन व्यवह्रियन्ते । एतेषु-

क. तिङ्वाच्यं यत् कर्तृरूपं कर्मरूपं वा कारकं तद्वाचिनि युष्मच्छब्दे (प्रयुक्तेऽप्रयुक्ते च) मध्यमपुरुषप्रत्ययाः भवन्ति, युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५ इति सूत्रेण ।

ख. तिङ्वाच्यं यत् कर्तृरूपं कर्मरूपं कारकं तद्वाचिनि अस्मच्छव्दे (प्रयुक्तेऽप्रयुक्ते च) उत्तमपुरुषप्रत्ययाः भवन्ति, अस्मद्युत्तमः १।४।१०७ इति सूत्रेण ।

ग. तिङ्वाच्यं यत् कर्तृरूपं कर्मरूपं वा कारकं तद्वाचिनि युष्मदस्मच्छब्दातिरिक्तशब्दे भावमात्रवाच्ये च प्रथमपुरुषप्रत्यया भवन्ति शेषे प्रथमः १।४।१०८ इति सूत्रेण

परस्मैपदे- प्रथमपुरुषप्रत्ययाः- ए. व. द्वि. व. ब.व.	मध्यमपुरुषप्रत्ययाः- ए. व. द्वि. व. ब. व	उत्तम्पुरुषप्रत्ययाः- ए.व.द्वि.व.ब.व.
तिप् तस् झि	सिप् थस् थ	मिप् वस् मस्
आत्मनेपदे- त आताम् झ	थास् आथाम् ध्वम्	इट्वहि महिङ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकारार्थः

लट् - क्रियायां वर्तमानकालिकत्वविवक्षायां वर्तमाने लट् ३।२।१२३ इति सूत्रेण धातोर्लट्प्रत्ययो भवति। वर्तमानत्वञ्च- प्रारब्धापरिसमाप्तत्वम्।

लिट् - कालो द्विविधः अद्यतनोऽनद्यतनश्च। भूतभविष्यद्भेदेन पुनर्द्विविधः अद्यतनभूतोऽनद्यतनभूतश्च तथैव अद्यतनभविष्यत्, अनद्यतनभविष्यच्चेति। तत्र अनद्यतनभूतकालिकपरोक्षक्रियायां परोक्षे लिट् ३।२।११५ इति सूत्रेण लिट्प्रत्ययो भवति परोक्षत्वञ्च कर्तृसाक्षिकज्ञानाविषयत्वम्।

लुट् - अनद्यतनभविष्यत्कालिकक्रियायां लुट्प्रत्ययो भवति अनद्यतने लुट् ३।३।१५ इति सूत्रेण (राम आगामिनि वर्षे परीक्षां लेखिता)।

लृट् भविष्यत्सामान्ये - सामान्य भविष्यत्कालिक क्रियायां लृट् शेषे च ३।३।१३ इति सूत्रेण लृट्प्रत्ययो भवति। (रामो गमिष्यति (अद्यवा श्वो वा) भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्।

लोट् - विधिः निमन्त्रणम् आमन्त्रणं, अधीष्टम्, संप्रश्नः, प्रार्थना एष्वर्थेषु लोट् च ३।३।१६२ इति सूत्रेण लोट् प्रत्ययो भवति।

विधिलिङ्– पूर्वोक्तेषु विध्यादिष्वेवार्थेषु विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१ इति सूत्रेण लिङ्प्रत्ययो भवति।

आशीर्लिङ् – आशिषि अर्थे च लिङ् प्रत्ययो लोट् च भवति। आशिषि लिङ् लोटौ ३।३।१७३ इति सूत्रेण विध्यादो जायमानो लिङ् विधिलिङ् आशिषि जायमानो लिङ् आशीर्लिङ् इत्युच्यते, परन्तु आशीर्लिङि रूपभेदो भवति। अत्र- विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषुलिङ्, लोट् च आशिषि लिङ् लोटौ, अनेन क्रमेण सूत्रार्थो बोद्धव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लङ्– अनद्यतन भूतकालिक क्रियायां धातोः -

" अनद्यतने लङ् ३।२।११" इति सूत्रेण लङ्प्रत्ययो भवति ।

लुङ्– सामान्यभूतकालिकक्रियायां धातोः " लुङ् "३।२।११० इति सूत्रेण लुङ्-प्रत्ययो भवति । भूतत्वञ्च वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वम् ।

लृङ् – हेतुहेतुमद्भावादि लिङ्निमित्तं " हेतुहेतुमतोर्लिङ् " ३।३।१५६ इति सूत्रात् तस्मिन्नर्थे विवक्षिते क्रियाया अनिष्पत्तौ गम्यमानायाम् भविष्यदर्थे " लिङ्निमित्ते लृङ्प्रत्ययो भवति । यथा- सुवृष्टिश्चेदभविष्यत् , सुभिक्षमभविष्यत् ।

=0=

अभ्यासः

प्रश्नाः

१. लृट्लकारः कस्मिन्नर्थे भवति ?

२. वर्तमानकाले को लकारो भवति ?

३. लोट्लकारविधाने के के अर्था विवक्षिता भवन्ति

४. लट् लृट् लोट् लङ् एतेषां लकाराणं मध्ये भूते को लकारो विधीयते ?

५. तिङ् प्रत्ययेषु आत्मनेपदप्रत्ययाः परस्मैपदप्रत्ययाश्च के ? ते परिगणनीयाः।

६. उभयोः पक्षयो : मध्यमपुरुषप्रत्यया विलेखनीयाः ।

७. परस्मैपदपक्षे उत्तमपुरुषप्रत्यया विलेखनीयाः ।

८. कीदृशा धातवः आत्मनेपदप्रत्ययवन्तो भवन्ति ?

९. कीदृशा धातव उभयपदिन उच्यन्ते ?

१०. सकर्मकत्वस्य किं लक्षणम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११. अकर्मकत्वस्य किं लक्षणम् ?

सुप्तिङन्तपदरूपे वाक्ये सुबन्तानि तिङन्तानि च पदानि भवन्ति । तेषु कतिपयपदप्रदर्शनं तच्छिक्षणनिदर्शनञ्च पूर्वेषु पाठेषु विहितम् । वाक्ये क्रियापदस्य मुख्यत्वादिदानीं कतिपयतिङन्तपदानां पाठ्यक्रमानु-रोधिरूपतालिकाप्रदर्शनमात्रं विधीयते ।

यद्यपि पाठ्यक्रमे लट्-लोट्-लङ्लकाराणामेव रूपतालिकाशिक्षणं निर्धारितं तथापि, विशेषजिज्ञासूनां निदर्शनबुद्धया भ्वादिगणे निर्धारितानां धातूनामवशिष्टेषु लकारेष्वपि रूपाणि प्रदर्श्यन्ते-

१. भू-सत्तायाम् (भ्वा. प. से. अक.)

लट्-लकारे	ए. व.	द्विव.	ब.व.
प्र. पु.	भवति	भवतः	भवन्ति
म. पु.	भवसि	भवथः	भवथ
उ. पु.	भवामि	भवावः	भवामः
लिट् लकारे			
प्र. पु.	बभूव	बभूवतुः	बभूवुः
म. पु.	बभूविथ	बमूवथुः	बभूव
उ. पु	बभूव	बभूविव	बभूविम
लुट् लकारे			
प्र. पु.	भविता	भवितारौ	भवितारः
म. पु.	भवितासि	भवितास्थः	भवितास्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ. पु	भवितास्मि	भवितास्वः	भवितास्मः

लृट्कारे

प्र. पु.	भविष्यति	भविष्यतः	भविष्यन्ति
म. पु.	भविष्यसि	भविष्यथः	भविष्यथ
उ. पु	भविष्यामि	भविष्यावः	भविष्यामः

लोट-्

प्र. पु.	भवतु , भवतात्	भवताम्	भवन्तु
म. पु.	भव , भवतात्	भवतम्	भवत
उ. पु	भवानि	भवाव	भवाम ।

लङ् लकारे -

प्र. पु.	अभवत्	अभवताम्	अभवन्
म. पु.	अभवः	अभवतम्	अभवत
उ. पु	अभवम्	अभवाव	अभवाम

विधिलिङ्-

प्र. पु.	भवेत	भवेताम	भवेयुः
म. पु.	भवेः	भवेतम	भवेत
उ. पु	भवेयम	भवेव	भवेम ।

आशीलिङ् -

प्र. पु.	भूयात	भूयास्ताम	भूयासुः
म. पु.	भूयाः	भूयास्तम	भूयास्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ. पु	भूयासम्	भूयास्व	भूयास्म ।
लुङ् लकारे			
प्र. पु.	अभूत्	अभूताम्	अभूवन्
म. पु.	अभूः	अभूतम्	अभूत
उ. पु	अभूवम्.	अभूव	अभूम ।
लृङ्लकारे-			
प्र. पु.	अभविष्यत्	अभविष्यताम्	अभविष्यन्
म. पु.	अभविष्यः	अभविष्यतम्	अभविष्यत
उ. पु	अभविष्यम्	अभविष्याव	अभविष्याम।

२. "पठ" व्यक्तायां वाचि (भ्वा. प. से. सक.)-

लट्	पठति	पठतः	पठन्ति
	पठसि	पठथः	पठथ
	पठामि	पठावः	पठामः ।
लिट्	पपाठ्	पेठतुः	पेठुः
	पेठिथ	पेठथुः	पेठ
	पपाठ, पपठ	पेठिव	पेठिम ।
लुट्	पठिता	पठितारौ	पठितारः
	पठितासि	पठितास्थः	पठितास्थ
	पठितास्मि	पठितास्वः	पठितास्मः ।
लृट्	पठिष्यति	पठिष्यतः	पठिष्यन्ति
	पठिष्यसि	पठिष्यथः	पठिष्यथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पठिष्यामि	पठिष्याव:	पठिष्याम:
लोट्	पठतु पठतात्	पठताम्	पठन्तु
	पठ पठतात्	पठतम्	पठत
	पठानि	पठाव	पठाम ।
लङ्	अपठत्	अपठताम्	अपठन्
	अपठ:	अपठतम्	अपठत
	अपठम्	अपठाव	अपठाम ।
लिङ् (बिध्यादौ)	पठेत्	पठेताम्	पठेयु:
	पठे:	पठेतम्	पठेत
	पठेयम्	पठेव	पठेम ।
लिङ्(आशिषि)	पठ्यात्	पठ्यास्ताम्	पठ्यासु:
	पठ्या:	पठ्यास्तम्	पठ्यास्त
	पठ्यासम्	पठ्यास्व	पठ्यास्म
लुङ्	अपाठीत्	अपाठिष्टाम्	अपाठिषु:
	अपाठी:	अपाठिष्टम्	अपाठिष्ट
	अपाठिषम्	अपाठिष्व	अपाठिष्म
लृङ्	अपठिष्यत्	अपठिष्यताम्	अपठिष्यन्
	अपठिष्य:	अपठिष्यतम्	अपठिष्यत
	अपठिष्यम्	अपठिष्याव	अपठिष्याम।

३. (स्था) "ष्ठा" गतिनिवृतौ (भ्वा. प. अ.) अक.-

लट्	तिष्ठति	तिष्ठत:	तिष्ठन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	तिष्ठसि	तिष्ठथः	तिष्ठथ
	तिष्ठामि	तिष्ठावः	तिष्ठामः
लिट्	तस्थौ	तस्थतुः	तस्थुः
	तस्थिथ, तस्थाथ	तस्थथुः	तस्थ
	तस्थौ	तस्थिव	तस्थिम
लुट्	स्थाता	स्थातारौ	स्थातारः
	स्थातासि	स्थातास्थः	स्थातास्थ
	स्थातास्मि	स्थातास्वः	स्थातास्मः
लृट्	स्थास्यति	स्थास्यतः	स्थास्यन्ति
	स्थास्यसि	स्थास्यथः	स्थास्यथ
	स्थास्यामि	स्थास्यावः	स्थास्यामः
लोट्	तिष्ठतु , तिष्ठतात्	तिष्ठताम्	तिष्ठन्तु
	तिष्ठ, तिष्ठतात्	तिष्ठतम्	तिष्ठत
	तिष्ठानि	तिष्ठाव	तिष्ठाम
लङ्	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम
लिङ् (विध्यादौ)	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
	तिष्ठेयम्	तिष्ठेव	तिष्ठेम
लिङ् (आशिषि)	स्थेयात्	स्थेयास्ताम्	स्थेयासुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	स्थेयाः	स्थेयास्तम्	स्थेयास्त
	स्थेयासम्	स्थेयास्व	स्थेयास्म
लुङ्	अस्थात्	अस्थाताम्	अस्थुः
	अस्थाः	अस्थातम्	अस्थात
	अस्थाम्	अस्थाव	अस्थाम
लृङ्	अस्थास्यत्	अस्थास्यताम्	अस्थास्यन्
	अस्थास्यः	अस्थास्यतम्	अस्थास्यत
	अस्थास्यम्	अस्थास्याव	अस्थास्याम

४. "पा" पाने (भ्वा. प. अ. सक)

लट्	पिबति	पिबतः	पिबन्ति
	पिबसि	पिबथः	पिबथ
	पिबामि	पिबावः	पिबामः
लिट्	पपौ	पपतुः	पपुः
	पपिथ, पपाथ	पपथुः	पप
	पपौ	पपिव	पपिम
लुट्	पाता	पातारौ	पातारः
	पातासि	पातास्थः	पातास्थ
	पातास्मि	पातास्वः	पातास्मः
लृट्	पास्यति	पास्यतः	पास्यन्ति
	पास्यसि	पास्यथः	पास्यथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पास्यामि	पास्याव:	पास्याम:
लोट्	पिबतु पिबतात्	पिबताम्	पिबन्तु
	पिब पिबतात्	पिबतम्	पिबत
	पिबानि	पिबाव	पिबाम
लङ्	अपिबत्	अपिबताम्	अपिबन्
	अपिब:	अपिबतम्	अपिबत
	अपिबम्	अपिबाव	अपिबाम
लिङ् (विध्यादौ)	पिबेत्	पिबेताम्	पिबेयु:
	पिबे:	पिबेतम्	पिबेत
	पिबेयम्	पिबेव	पिबेम
लिङ् (आशिषि)	पेयात्	पेयास्ताम्	पेयासु:
	पेया:	पेयास्तम्	पेयास्त
	पेयासम्	पेयास्व	पेयास्म
लुङ्	अपास्यत्	अपास्यताम्	अपास्यन्
	अपास्य:	अपास्यतम्	अपास्यत
	अपास्यम्	अपास्याव	अपास्याम

५. दृशिर प्रेक्षणे (भ्वा. प. अ.) सक.

लट् (पाघ्रेति पश्यादेश:)

	पश्यति	पश्यत:	पश्यन्ति
	पश्यसि	पश्यथ:	पश्यथ
	पश्यामि	पश्याव:	पश्याम:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिट्	ददर्श	ददृशतुः	ददृशुः
	ददर्शिथ, दद्रष्ठ	ददृशथुः	ददृश
	ददर्श	ददृशिव	ददृशिम
लुट्	द्रष्टा	द्रष्टारौ	द्रष्टारः
	द्रष्टासि	द्रष्टास्थः	द्रष्टास्थ
	द्रष्टास्मि	द्रष्टास्वः	द्रष्टास्मः
लृट्	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः
लोट्	पश्यतु, पश्यतात्	पश्यताम्	पश्यन्तु
	पश्य, पश्यतात्	पश्यतम्	पश्यत
	पश्यानि	पश्याव	पश्याम
लङ्	अपश्यत्	अपश्यताम्	अपश्यन्
	अपश्यः	अपश्यतम्	अपश्यत
	अपश्यम्	अपश्याव	अपश्याम
लिङ् (विध्यादौ)	पश्येत्	पश्येताम्	पश्येयुः
	पश्येः	पश्येतम्	पश्येत
	पश्येयम्	पश्येव	पश्येम
लिङ् (आशिषि)	दृश्यात्	दृश्यास्ताम्	दृश्यासुः
	दृश्याः	दृश्यास्तम्	दृश्यास्त
	दृश्यासम्	दृश्यास्व	दृश्यास्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लुङ् (इरितोवा, इति अङ् पक्षे)-

	अदर्शत्	अदर्शताम्	अदर्शन्
	अदर्शः	अदर्शतम्	अदर्शत
	अदर्शम्	अदर्शाव	अदर्शाम
:अङभावपक्षे	अद्राक्षीत्	अद्राष्टाम्	अद्राक्षुः
	अद्राक्षीः	अद्राष्टम्	अद्राष्ट
	अद्राक्षम्	अद्राक्ष्व	अद्राक्ष्म

" श्रु" श्रवणे (भ्वा. प. अ.) सक.

लट्	शृणोति	शृणुतः	शृण्वन्ति
	शृणोषि	शृणुथः	शृणुथ
	शृणोमि	शृण्व, शृणुवः शृण्मः,	शृणुमः
लिट्	शुश्राव	शुश्रुवतुः	शुश्रुवुः
	शुश्रोथ	शुश्रुवथुः	शुश्रुव
	शुश्राव॰ शुश्रव	शुश्रुव	शुश्रुम
लुट	श्रोता	श्रोतारौ	श्रोतारः
	श्रोतासि	श्रोतास्थः	श्रोतास्थ
	श्रोतास्मि	श्रोतास्वः	श्रोतास्मः
लृट्	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति
	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ
	श्रोष्यामि	श्रोष्याव	श्रोष्यामः
लोट्	शृणोतु, शृणुतात्	शृणुताम्	शृण्वन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	शृणु, शृणुतात्	शृणुतम्	शृणुत
	शृणवानि	शृणवाव	शृणवाम
लङ्	अशृणोत्	अशृणुताम्	अशृण्वन्
	अशृणोः	अशृणुतम्	अशृणुत
	अशृणवम्	अशृण्व ,अशृणुव	अशृण्म अशृणुम
लिङ् (विध्यादौ)	शृणुयात्	शृणुयाताम्	शृणुयुः
	शृणुयाः	शृणुयातम्	शृणुयात
	शृणुयाम्	शृणुयाव	शृणुयाम
लिङ् (आशिषि)	श्रूयात्	श्रूयास्ताम्	श्रूयासुः
	श्रूयाः	श्रूयास्तम्	श्रूयास्त
	श्रूयासम्	श्रूयास्व	श्रूयास्म
लुङ्	अश्रौषीत्	अश्रौष्टाम्	अश्रौषुः
	अश्रौषीः	अश्रौष्टम्	अश्रौष्ट
	अश्रौषम्	अश्रौष्व	अश्रौष्म
लृङ्	अश्रोष्यत्	अश्रोष्यताम्	अश्रोष्यन्
	अश्रोष्यः	अश्रोष्यतम्	अश्रोष्यत
	अश्रोष्यम्	अश्रोष्याव	अश्रोष्याम

" घ्रा " गन्धोपादाने (भ्वा. प. अ.) अक.

(पाघ्रेति जिघ्रादेशः)

लट्	जिघ्रति	जिघ्रतः	जिघ्रन्ति
	जिघ्रसि	जिघ्रथः	जिघ्रथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	जिघ्रामि	जिघ्राव:	जिघ्राम:
लिट्	जघ्रौ	जघ्रतु:	जघ्रु:
	जघ्रिथ, जघ्राथ	जघ्रथु:	जघ्र
	जघ्रौ	जघ्रिव	जघ्रिम
लुट्	घ्राता	घ्रातारौ	घ्रातार:
	घ्रातासि	घ्रातास्थ:	घ्रातास्थ
	घ्रातास्मि	घ्रातास्व	घ्रातास्म:
लृट्	घ्रास्यति	घ्रास्यत:	घ्रास्यन्ति:
	घ्रास्यसि	घ्रास्यथ:	घ्रास्यथ
	घ्रास्या मि	घ्रास्याव:	घ्रास्याम:
लोट्	जिघ्रतु , जिघ्रतात्	जिघ्रताम्	जिघ्रन्तु
	जिघ्र ,जिघ्रतात्	जिघ्रतम्	जिघ्रत
	जिघ्राणि	जिघ्राव	जिघ्राम
लङ्	अजिघ्रत्	अजिघ्रताम्	अजिघ्रन्
	अजिघ्र:	अजिघ्रतम्	अजिघ्रत
	अजिघ्रम्	अजिघ्राव	अजिघ्राम
लिङ् (विध्यादौ)	जिघ्रेत्	जिघ्रेताम्	जिघ्रेयु:
	जिघ्रे:	जिघ्रेतम्	जिघ्रेत
	जिघ्रेयम्	जिघ्रेव	जिघ्रेम

"लिङ् (आशिषि) वान्यस्य संयोगादेरिति एत्वविकल्प:

	घ्रेयात्	घ्रेयास्ताम्	घ्रेयासु:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	घ्रेयाः	घ्रेयास्तम्	घ्रेयास्त
	घ्रेयासम्	घ्रेयास्व	घ्रेयास्म
	घ्रायात्	घ्रायास्ताम्	घ्रायासुः
	घ्रायाः	घ्रायास्तम्	घ्रायास्त
	घ्रायासम्	घ्रायास्व	घ्रायास्म

लुङ् (विभाषा घ्राधेट् इति सिज्लुक् पक्षे)

	अघ्रात्	अघ्राताम्	अघ्रुः
	अघ्राः	अघ्रातम्	अघ्रात
	अघ्राम्	अघ्राव	अघ्राम

(लुगभावपक्षे यमरमनमातामिति सक्)

	अघ्रासीत्	अघ्रासिष्टाम्	अघ्रासिषुः
	अघ्रासीः	अघ्रासिष्टम्	अघ्रासिष्ट
	अघ्रासिषम्	अघ्रासिष्व	अघ्रासिष्म
लृङ्	अघ्रास्यत्	अघ्रास्यताम्	अघ्रास्यन्
	अघ्रास्यः	अघ्रास्यतम्	अघ्रास्यत
	अघ्रास्यम्	अघ्रास्याव	अघ्रास्याम

८. " गमॢ " गतौ (भ्वा.प. अ.)

लट्	गच्छति	गच्छतः	गच्छन्ति
	गच्छसि	गच्छथः	गच्छथ
	गच्छामि	गच्छावः	गच्छामः
लिट्	जगाम	जग्मतुः	जग्मुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	जगमिथ, जगन्थ	जग्मथुः	जग्म
	जगाम, जगम	जग्मिव	जग्मिम
लुट्	गन्ता	गन्तारौ	गन्तारः
	गन्तासि	गन्तास्थः	गन्तास्थ
	गन्तास्मि	गन्तास्वः	गन्तास्मः
लृट्	गमिष्यति	गमिष्यतः	गमिष्यन्ति
	गमिष्यसि	गमिष्यथः	गमिष्यथ
	गमिष्यामि	गमिष्यावः	गमिष्यामः
लोट्	गच्छतु गच्छतात्	गच्छताम्	गच्छन्तु
	गच्छ गच्छतात्	गच्छतम्	गच्छत
	गच्छानि	गच्छाव	गच्छाम
लङ्	अगच्छत्	अगच्छताम्	अगच्छन्
	अगच्छः	अगच्छतम्	अगच्छत
	अगच्छम्	अगच्छाव	अगच्छाम
·लिङ् (विध्यादौ)	गच्छेत्	गच्छेताम्	गच्छेयु :
	गच्छेः	गच्छेतम्	गच्छेत
	गच्छेयम्		अच्छेव गच्छेम
लिङ् (आशिषि)	गम्यात्	गम्यास्ताम्	गम्यासुः
	गम्याः	गम्यास्तम्	गम्यास्त
	गम्यासम्	गम्यास्व	गम्यास्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लुङ् (लृदित्वादङ्)	अगमत्	अगमताम्	अगमन्
	अगमः	अगमतम्	अगमत
	अगमम्	अगमाव	अगमाम
लृङ्	अगमिष्यत्	अगमिष्यताम्	अगमिष्यन्
	अगमिष्यः	अगमिष्यतम्	अगमिष्यत
	अगमिष्यम्	अगमिष्याव	अगमिष्याम

" रक्ष " पालने (भ्वा. प. से. सक.)

लट्	रक्षति	रक्षतः	रक्षन्ति
	रक्षसि	रक्षथः	रक्षथ
	रक्षामि	रक्षावः	रक्षामः
लिट्	ररक्ष	ररक्षतुः	ररक्षु :
	ररक्षिथ	ररक्षथुः	ररक्ष
	ररक्ष	ररक्षिव	ररक्षिम
लुट्	रक्षिता	रक्षितारौ	रक्षितारः
	रक्षितासि	रक्षितास्थः	रक्षितास्थ
	रक्षितास्मि	रक्षितास्वः	रक्षितास्मः
लृट्	रक्षिष्यति	रक्षिष्यतः	रक्षिष्यन्तिः
	रक्षिष्यसि	रक्षिष्यथः	रक्षिष्यथ
	रक्षिष्यामि	रक्षिष्यावः	रक्षिष्यामः
लोट्	रक्षतु, रक्षतात्	रक्षताम्	रक्षन्तु
	रक्ष, रक्षतात्	रक्षतम्	रक्षत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	रक्षाणि	रक्षाव	रक्षाम
लङ्	अरक्षत्	अरक्षताम्	अरक्षन्
	अरक्षः	अरक्षतम्	अरक्षत
	अरक्षम्	अरक्षाव	अरक्षाम
लिङ् (विध्यादौ)	रक्षेत्	रक्षेताम्	रक्षेयुः
	रक्षेः	रक्षेतम्	रक्षेत
	रक्षेयम्	रक्षेव	रक्षेम
लिङ् (आशिषि)	रक्ष्यात्	रक्ष्यास्ताम्	रक्ष्यासुः
	रक्ष्याः	रक्ष्यास्तम्	रक्ष्यास्त
	रक्ष्यासम्	रक्ष्यास्व	रक्ष्यास्म
लुङ्	अरक्षीत्	अरक्षिष्टाम्	अरक्षिषु :
	अरक्षीः	अरक्षिष्टम	अरक्षिष्ट
	अरक्षिषम्	अरक्षिष्व	अरक्षिष्म

" हसे " हसने (भ्वा. प. से.) अक.

लट्	हसति	हसतः	हसन्ति
	हससि	हसथः	हसथ
	हसामि	हसावः	हसामः
लिट्	जहास	जहसतुः	जहसुः
	जहसिथ	जहसथुः	जहस
	जहास जहास	जहसिव	जहसिम
लुट्	हसिता	हसितारौ	हसितारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	हसितासि	हसितास्थः	हसितास्थ
	हसितास्मि	हसितास्वः	हसितास्मः
लृट्	हसिष्यति	हसिष्यतः	हसिष्यन्ति
	हसिष्यसि	हसिष्यथः	हसिष्यथ
	हसिष्यामि	हसिष्यावः	हसिष्यामः
लोट्	हसतु, हसतात्	हसताम्	हसन्तु
	हस, हसतात्	हसतम्	हसत
	हसानि	हसाव	हसाम
लङ्	अहसत्	अहसताम्	अहसन्
	अहसः	अहसतम्	अहसत
	अहसम्	अहसाव	अहसाम
लिङ् (वि)	हसेत्	हसेताम्	हसेयुः
	हसेः	हसेतम्	हसेत
	हसेयम्	हसेव	हसेम
लिङ् (आ.)	हस्यात्	हस्यास्ताम्	हस्यासुः
	हस्याः	हस्यास्तम्	हस्यास्त
	हस्यासम्	हस्यास्व	हस्यास्म
लुङ्	अहसीत्	अहसिष्टाम्	अहसिषुः
	अहसीः	अहसिष्टम्	अहसिष्ट
	अहसिषम्	अहसिष्व	अहसिष्म
लृङ्	अहसिष्यत	अहसिष्यताम	अहसिष्यन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	अहसिष्यः	अहसिष्यतम्	अहसिष्यत
	अहसिष्यम्	अहसिष्याव	अहसिष्याम

" एध " वृद्धौ (भ्वा. आ. से. अक.)

लट्	एधते	एधेते	उधन्ते
	एधसे	एधेथे	एधध्वे
	एधे	एधावहे	एधामहे
लिट्	एधाञ्चक्रे	एधाञ्चक्राते	एधाञ्चक्रिरे
	एधाञ्चकृषे	एधाञ्चक्राथे	एधाञ्चकृढ्वे
	एधाञ्चक्रे	एधाञ्चकृवहे	एधाञ्चकृमहे
लुट्	एधिता	एधितारौ	एधितारः
	एधितासे	एसधितासाथे	एधिताध्वे
	एधिताहे	एधितास्वहे	एधितास्महे
लृट्	एधिष्यते	एधिष्यते	एधिष्यन्ते
	एधिष्यसे	एधिष्यथे	एधिष्यध्वे
	एधिष्ये	एधिष्यावहे	एधिष्यामहे।
लोट्	एधताम्	एधेताम्	एधन्ताम्
	एधस्व	एधेथाम्	एधध्वम्
	एधै	एधावहै	एधामहै
लङ्	ऐधत	ऐधेताम्	ऐधन्त
	ऐधथाः	ऐधेथाम्	ऐधध्वम्
	ऐधे	ऐधावहि	ऐधामहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिङ् (वि.)	एधेत	एधेयाताम्	एधेरन्
	एधेथा:	एधेयाथाम्	ऐधेध्वम्
	एधेय	एधेवहि	एधेमहि
लिङ् (आ.)	एधिषीष्ट	एधिषीयास्ताम्	एधिषीरन्
	एधिषीष्ठा:	एधिषीयास्थाम्·	एधिषीध्वम्
	एधिषीय	एधिषीवहि	एधिषीमहि।
लुङ्	ऐधिष्ट	ऐधिषाताम्	ऐधिषत
	ऐधिष्ठा:	ऐधिषाथाम्	ऐधिढ्वम्
	ऐधिषि	ऐधिष्वहि	ऐधिष्महि
लृङ्	ऐधिष्यत	ऐधिष्येताम्	ऐधिष्यन्त
	ऐधिष्यथा:	ऐधिष्येथाम्	ऐधिष्यध्वम्
	ऐधिष्ये	ऐधिष्यावहि	ऐधिष्यामहि

" भाष " व्यक्तायां वाचि (भ्वा. आ. से. सक.)

लट्	भाषते	भाषेते	भाषन्ते
	भाषसे	भाषेथे	भाषध्वे
	भाषे	भाषावहे	भाषामहे
लिट्	बभाषे	बभाषाते	बभाषिरे
	बभाषिषे	बभाषाथे	बभाषिध्वे
	बभाषे	बभाषिवहे	बभाषिमहे।
लुट्	भाषिता	भाषितारौ	भाषितार:
	भाषितासे	भाषितासाथे	भाषिताध्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	भाषिताहे	भाषितास्वहे	भाषितास्महे
लेट्	भाषिष्यते	भाषिष्येते	भाषिष्यन्ते
	भाषिष्यसे	भाषिष्येथे	भाषिष्यध्वे
	भाषिष्ये	भाषिष्यावहे	भाषिष्यामहे ।
लोट्	भाषताम्	भाषेताम्	भाषन्ताम्
	भाषस्व	भाषेथाम्	भाषध्वम्
	भाषै	भाषावहै	भाषामहै ।
लङ्	अभाषत	अभाषेताम्	अभाषन्त
	अभाषथाः	अभाषेथाम्	अभाषध्वम्
	अभाषे	अभाषावहि	अभाषामहि
लिङ् (वि)	भाषेत	भाषेयाताम्	भाषेरन्
	भाषेथाः	भाषेयाथाम्	भाषेध्वम्
	भाषेय	भाषेवहि	भाषेमहि
लि. (आ.)	भाषिषीष्ट	भाषिषीयास्ताम्	भाषिषीरन्
	भाषिषीष्ठाः	भाषिषीयास्थाम्	भाषिषीध्वम्
	भाषिषीय	भाषिषीवहि	भाषिषीमहि
लुङ्	अभाषिष्ट	अभाषिषाताम्	अभाषिषत
	अभाषिष्ठाः	अभाषिषाथाम्	अभाषिध्वम्
	अभाषिषि	अभाषिष्वहि	अभाषिष्महि
लृङ्	अभाषिष्यत	अभाषिष्येताम्	अभाषिष्यन्त
	अभाषिष्यथाः	अभाषिष्येथाम्	अभाषिष्यध्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	अभापिप्ये	अभापिप्यावहि	अभापिप्यामहि

"श्लाघृ " कत्थने । भ्वा. आ. से. अक.

लट्	श्लाघते	श्लाघेते	श्लाघन्ते
	श्लाघसे	श्लाघेथे	श्लाघध्वे
	श्लाघे	श्लाघावहे	श्लाघामहे
लिट्	शश्लाघे	शश्लाघाते	शश्लाघिरे
	शश्लाघिषे	शश्लाघाथे	शश्लाघिध्वे
	शश्लाघे	शश्लाघिवहे	शश्लाघिमहे
लुट्	श्लाघिता	श्लाघितारौ	श्लाघितारः
	श्लाघितासे	श्लाघितासाथे	श्लाघिताध्वे
	श्लाघिताहे	श्लाघितास्वहे	श्लाघितास्महे
लृट्	श्लाघिष्यते	श्लाघिष्यते	श्लाघिष्यन्ते
	श्लाघिष्यसे	श्लाघिष्येथे	श्लाघिष्यध्वे
	श्लाघिष्ये	श्लाघिष्यावहे	श्लाघिष्यामहे
लोट्	श्लाघताम्	श्लाघेताम्	श्लाघन्ताम्
	श्लाघस्व	श्लाघेथाम्	श्लाघध्वम्
	श्लाघै	श्लाघावहै	श्लाघामहै
लङ्	अश्लाघत	अश्लाघेताम्	अस्लाघन्त
	अश्लाघथाः	अश्लाघेथाम्	अश्लाघध्वम्
	अश्लाघे	अश्लाघावहि	अश्लाघामहि
लिङ् (वि.)	श्लाघेत	श्लाघेयाताम्	श्लाघेरन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	श्लाघेथाः	श्लाघेयाथाम्	श्लाघेध्वम्
	श्लाघेय	श्लाघेवहि	श्लाघेमहि
लिङ् (आ.)	श्लाघिषीष्ट	श्लाघिषीयास्ताम्	श्लाघिषीरन्
	श्लाघिषीष्ठाः	श्लाघिषीयास्थाम्	श्लाघिषीध्वम्
	श्लाघिषीय	श्लाघिषीवहि	श्लाघिषीमहि
लुङ्	अश्लाघिष्ट	अश्लाघिषाताम्	अश्लाघिषत
	अश्लाघिष्ठाः	अश्लाघिषाथाम्	अश्लाघिध्वम्
	अश्लाघिषि	अश्लाघिष्वहि	अश्लाघिष्महि
लृङ्	अश्लाघिष्यत	अश्लाघिष्येताम्	अश्लाघिष्यन्त
	अश्लाघिष्यथाः	अश्लाघिष्येथाम्	अश्लाधिष्यध्वम्
	अश्लाघिष्ये	अश्लाघिष्यावहि	अश्लाघिष्यामहि

" मुद " हर्षे (भ्वा. आ. से.) अक.

लट्	मोदते	मोदेते	मोदन्ते
	मोदसे	मोदेथे	मोदध्वे
	मोदे	मोदावहे	मोदामहे
लिट्	मुमुदे	मुमुदाते	मुमुदिरे
	मुमुदिषे	मुमुदाथे	मुमुदिध्वे
	मुमुदे	मुमुदिवहे	मुमुदिमहे
लुट्	मोदिता	मोदितारौ	मोदितारः
	मोदितासे	मोदितासाथे	मोदिताध्वे
	मोदिताहे	मोदितास्वहे	मोदितास्महे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लृट्	मोदिष्यते	मोदिष्येते	मोदिष्यन्ते
	मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे
	मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे
लोट्	मोदताम्	मोदेताम्	मोदन्ताम्
	मोदष्व	मोदेथाम्	मोदध्वम्
	मोदै	मोदावहै	मोदामहै
लङ्	अमोदत	अमोदेताम्	अमोदन्त
	अमोदथाः	अमोदेथाम्	अमोदध्वम्
	अमोदे	अमोदावहि	अमोदामहि
लिङ् (वि)	मोदेत	मोदेयाताम्	मोदेरन्
	मोदेथाः	मोदेयाथाम्	मोदेध्वम्
	मोदेय	मोदेवहि	मोदेमहि
लिङ् (आ)	मोदिषीष्ट	मोदिषीयास्ताम्	मोदिषीरन्
	मोदीषीष्ठाः	मोदिषीयास्थाम्	मोदिषीध्वम्
	मोदिषीय	मोदिषीवहि	मोदिषीमहि
लुङ्	अमोदिष्ट	अमोदिषताम्	अमोदिषत
	अमोदिष्ठाः	अमोदिषाथाम्	अमोदिढ्वम्
	अमोदिषि	अमोदिष्वहि	अमोदिष्महि
लृङ्	अमोदिष्यत	अमोदिष्येताम्	अमोदिष्यन्त
	अमोदिष्यथाः	अमोदिष्येथाम्	अमोदिष्यध्वम्
	अमोदिष्ये	अमोदिष्यावहि	अमोदिष्यामहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

" वृतु " वर्तने (भ्वा. आ. से. अक.)

लट्	वर्तते	वर्तेते	वर्तन्ते
	वर्तसे	वर्तेथे	वर्तध्वे
	वर्ते	वर्तावहे	वर्तामहे
लिट्	ववृते	ववृताते	ववृतिरे
	ववृतिषे	ववृताथे	ववृतिध्वे
	ववृते	ववृतिवहे	ववृतिमहे
लुट्	वर्तिता	वर्तितारौ	वर्तितारः
	वर्तितासे	वर्तितासाथे	वर्तिताध्वे
	वर्तिताहे	वर्तितास्वहे	वर्तितास्महे

लृट् अत्र "वृद्भ्यः स्यसनोः " १।३।९२ इति सूत्रेण स्ये विकल्पेन परस्मैपदम् भवति । परस्मैपदपक्षे " न वृद्भ्यश्चतुर्भ्यः " ७।२।५९ इति सूत्रेण इण्निषेधो भवति ।

परस्मैपदपक्षे -

वर्त्स्यति	वर्त्स्यतः	वर्त्स्यन्ति
वर्त्स्यसि	वर्त्स्यथः	वर्त्स्यथ
वर्त्स्यामि	वर्त्स्यावः	वर्त्स्यामः

आत्मनेपदपक्षे -

वर्तिष्यते	वर्तिष्येते	वर्तिष्यन्ते
वर्तिष्यसे	वर्तिष्येथे	वर्तिष्यध्वे
वर्तिष्ये	वर्तिष्यावहे	वर्तिष्यामहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोट्	वर्तताम्	वर्तेताम्	वर्तन्त ाम्
	वर्तस्व	वर्तेथाम	वर्तध्वम्
	वर्तै	वर्तावहै	वर्तामहै
लङ्	अवर्तत	अवर्तेताम्	अवर्तन्त
	अवर्तथाः	अवर्तेथाम्	अवर्तध्वम्
	अवर्ते	अवर्तावहि	अवर्तामहि
वि. लिङ्	वर्तेत	वर्तेयाताम्	वर्तेरन्
	वर्तेथाः	वर्तेयाथाम्	वर्तेध्वम्
	वर्तेय	वर्तेवहि	वर्तेमहि
आ- लिङ्	वर्तिषीष्ट	वर्तिषीयास्ताम्	वर्तिषीरन्
	वर्तिषीष्ठाः	वर्तिषीयास्थाम्	वर्तिषीध्वम्
	वर्तिषीय	वर्तिषीवहि	वर्तिषीमहि

लुङ् -अत्र " द्युद्भ्यो लुङि " १।३।९१ इति सूत्रेण विकल्पेन परस्मैपदं भवति। परस्मैपदपक्षे "पुषादिद्युताद्यॢदितः परस्मैपदेषु " ३।१।५५ इति सूत्रेण च्लेरङ् भवति

परस्मैपदपक्षे-

	अवृतत्	अवृतताम्	अवृतन्
	अवृतः	अवृततम्	अवृतत
	अवृतम्	अवृताव	अवृताम
आत्मनेपदपक्षे-	अवर्तिष्ट	अवर्तिषाताम्	अवर्तिषत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवर्तिष्ठाः	अवर्तिषाथाम्	अवर्तिढ्वम्
अवर्तिषि	अवर्तिष्वहि	अवर्तिष्महि

लृङ् अत्र"वृद्भ्यःस्यसनोः" १।३।९२ इति सूत्रेण स्यविषये विकल्पेन परस्मैपदम् भवति ।परस्मैपदपक्षे " न वृद्भ्यश्चतुर्भ्यः " ६।२।५९ इति सूत्रेण इण्निषेधो भवति ।

परस्मैपदपक्षे -

अवर्त्स्यत्	अवर्त्स्यताम्	अवर्त्स्यन्
अवर्त्स्यः	अवर्त्स्यतम्	अवर्त्स्यत
अवर्त्स्यम्	अवर्त्स्याव	अवर्त्स्याम

आत्मनेपदपक्षे -

अवर्तिष्यत	अवर्तिष्येताम्	अवर्तिष्यन्त
अवर्तिष्यथाः	अवर्तिष्येथाम्	अवर्तिष्यध्वम्
अवर्तिष्ये	अवर्तिष्यावहि	अवर्तिष्यामहि

अथोभयपदिनः-

" श्रिञ " सेवायाम (भ्वा.उभ.से. सक.)

लट् परस्मैपदपक्षे

श्रयति	श्रयतः	श्रयन्ति
श्रयसि	श्रयथः	श्रयथ
श्रयामि	श्रयावः	श्रयामः

आत्मनेपदपक्षे -

श्रयते	श्रयेते	श्रयन्ते
श्रयसे	श्रयेथे	श्रयध्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	श्रये	श्रयावहे	श्रयामहे
लिट् पर.	शिश्राय	शिश्रियतु:	शिश्रियु:
	शिश्रयिथ	शिश्रियथु:	शिश्रिय
	शिश्राय / शिश्रय	शिश्रियिव	शिश्रियिम;
आत्म.	शिश्रिये	शिश्रियाते	शिश्रियिरे
	शिश्रियिषे	शिश्रियाथे	शिश्रियिढ्वे / ध्वे
	शिश्रिये	शिश्रियिवहे	शिश्रियिमहे
लुट् पर०	श्रयिता	श्रयितारौ	श्रयितार:
	श्रयितासि	श्रयितास्थ:	श्रयितास्थ
	श्रयितास्मि	श्रयितास्व :	श्रयितास्म:
आत्म०	श्रयिता	श्रयितारौ	श्रयितार:
	श्रयितासे	श्रयितासाथे	श्रयिताध्वे
	श्रयिताहे	श्रयितास्वहे	श्रयितास्महे
लृट् पर.	श्रयिष्यति	श्रयिष्यत:	श्रयिष्यन्ति
	श्रयिष्यसि	श्रयिष्यथ:	श्रयिष्यथ
	श्रयिष्यामि	श्रयिष्याव:	श्रयिष्याम:
आत्म.	श्रयिष्यते	श्रयिष्येते	श्रयिष्यन्ते
	श्रयिष्यसे	श्रयिष्येथे	श्रयिष्यध्वे
	श्रयिष्ये	श्रयिष्यावहे	श्रयिष्यामहे
लोट् पर.	श्रयतु श्रयतात्	श्रयताम्	श्रयन्तु
	श्रय श्रयतात्	श्रयतम्	श्रयत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	श्रयाणि	श्रयाव	श्रयाम
आत्म.	श्रयताम्	श्रयेताम्	श्रयन्ताम
	श्रयस्व	श्रयेथाम्	श्रयध्वम्
	श्रयै	श्रयावहै	श्रयामहै
लङ् पर.	अश्रयत्	अश्रयताम्	अश्रयन्
	अश्रयः	अश्रयतम्	अश्रयत
	अश्रयम्	अश्रयाव	अश्रयाम,
आत्म.	अश्रयत	अश्रयेताम्	अश्रयन्त
	अश्रयथाः	अश्रयेथाम्	अश्रयध्वम्
	अश्रये	अश्रयावहि	अश्रयामहि
विधिलिङ् पर.	श्रयेत्	श्रयेताम्	श्रयेयुः
	श्रयेः	श्रयेतम्	श्रयेत
	श्रयेयम्	श्रयेव	श्रयेम
आत्म	श्रयेत	श्रयेयाताम्	श्रयेरन्
	श्रयेथाः	श्रयेयाथाम्	श्रयेध्वम्
	श्रयेय	श्रयेवहि	श्रयेमहि
आ लिङ पर.	श्रीयात्	श्रीयास्ताम्	श्रीयासुः
	श्रीयाः	श्रीयास्तम्	श्रीयास्त
	श्रीयासम्	श्रीयास्व	श्रीयास्म
आत्म.	श्रयिषीष्ट	श्रयिषीयास्ताम्	श्रयिषीरन्
	श्रयिर्पाष्ठाः	श्रयिर्पीयास्थाम्	श्रयिर्पाढ्वम ध्वम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	श्रायिषीय	श्रायिषीवहि	श्रायिषीमहि ।
लुङ् पर.	अशिश्रियत्[1]	अशिश्रियताम्	अशिश्रियन्
	अशिश्रियः	अशिश्रियतम्	अशिश्रियत
	अशिश्रियम्	अशिश्रियाव	अशिश्रियाम,
आत्म.	अशिश्रियत	अशिश्रियेताम्	अशिश्रियन्त
	अशिश्रियथाः	अशिश्रियेथाम्	अशिश्रियध्वम्
	अशिश्रिये	अशिश्रियावहि	अशिश्रियामहि

" णीञ् " प्रापणे । भ्वा. उभ. अ. सक.)

लट् पर.	नयति	नयतः	नयन्ति
	नयसि	नयथः	नयथ
	नयामि	नयावः	नयामः,
आत्म.	नयते	नयेते	नयन्ते
	नयसे	नयेथे	नयध्वे
	नये	नयावहे	नयामहे
लिट् पद.	निनाय	निन्यतुः	निन्युः
	निनयिथ निनेथ.	निन्यथुः	निन्य
	निनाय निनय	निन्यिव	निन्यिम
आत्म.	निन्ये	निन्याते	निन्यिरे
	निन्यिषे	निन्याथे	निन्यिढ्वे ध्वे

१."णिश्रिद्रुस्रुभ्य कर्तरि चङ्" ३-१-४८ इति चङ्,चङि ६-१-११ इति द्वित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	निन्ये	निन्यिवहे	निन्यिमहे
लुट् पर.	नेता	नेतारौ	नेतारः
	नेतासि	नेतास्थः	नेतास्थ
	नेतास्मि	नेतास्वः	नेतास्मः;
आत्म.	नेता	नेतारौ	नेतारः
	नेतासे	नेतासाथे	नेताध्वे
	नेताहे	नेतास्वहे	नेतास्महे
लृट् पर.	नेष्यति	नेष्यतः	नेष्यन्ति
	नेष्यसि	नेष्यथः	नेष्यथ
	नेष्यामि	नेष्यावः	नेष्यामः,
आत्म	नेष्यते	नेष्येते	नेष्यन्ते
	नेष्यसे	नेष्येथे	नेष्यध्वे
	नेष्ये	नेष्यावहे	नेष्यामहे
लोट् पर.	नयतु नयतात्	नयताम्	नयन्तु
	नय नयतात्	नयतम्	नयत
	नयानि	नयाव	नयाम
आत्म.	नयताम्	नयेताम्	नयन्ताम्
	नयस्व	नयेथाम्	नयध्वम्
	नयै	नयावहै	नयामहै
लङ् पर	अनयत्	अनयताम्	अनयन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	अनयः	अनयतम्	अनयत
	अनयम्	अनयाव	अनयाम
आत्म॰	अनयत	अनयेतांम्	अनयन्त
	अनयथाः	अनयेथाम्	अनयध्वम्
	अनये	अनयावहि	अनयामहि
विलिङ् परः	नयेत्	नयेताम्	नयेयुः
	नयेः	नयेतम्	नयेत
	नयेयम्	नयेव	नयेम
आत्म॰	नयेत	नयेयाताम्	नयेरन्
	नयेथाः	नयेयाथाम्	नयेध्वम्
	नयेय	नयेवहि	नयेमहि
आशीर्लिङ् पर.	नीयात्	नीयास्ताम्	नीयासुः
	नीयाः	नीयास्तम्	नीयास्त
	नीयासम्	नीयास्व	नीयास्म
आत्म	नेषीष्ट	नेषीयास्ताम्	नेषीरन्
	नेषीष्ठाः	नेषीयास्थाम्	नेषीढ्वम्
	नेषीय	नेषीवहि	नेषीमहि
लुङ् पर.	अनैषीत	अनैष्टाम्	अनैषुः
	अनैषीः	अनैष्टम्	अनैष्ट
	अनैषम्	अनैष्व	अनैष्म
आत्म॰	अनेष्ट	अनेषाताम्	अनेषत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	अनेप्ठाः	अनेपाथाम्	अनेढ्वम्
	अर्नेप	अनेप्वहि	अनेप्महि
लृङ् पर.	अनेप्यत्	अनेप्यताम्	अनेप्यन्
	अनेप्यः	अनेप्यतम्	अनेप्यत
	अनेप्यम्	अनेप्याव	अनेप्याम,
आत्म.	अनेप्यत	अनेप्येताम्	अनेप्यन्त
	अनेप्यथाः	अनेप्येथाम्	अनेप्यध्वम्
	अनेप्ये	अनेप्यावहि	अनेप्यामहि

" भृञ् " भरणे (भ्वा. उभ. अ. सक.)

(पाठ्यक्रमेऽनिर्धारितोऽप्ययं धातुर्ऋकारान्तोदाहरणत्वेनात्र लिखितः)

लट् परस्मै.	भरति	भरतः	भरन्ति
	भरसि	भरथः	भरथ
	भरामि	भराव	भरामः
आत्मने.	भरते	भरेते	भरन्ते
	भरसे	भरेथे	भरध्वे
	भरे	भरावहे	भरामहे
लिट् परस्मै.	बभार	बभ्रतुः	बभ्रुः
	बभर्थ	बभ्रथुः	बभ्र
	बभार/बभर	बभृव	बभृम
आत्मने.	बभ्रे	बभ्राते	बभ्रिरे
	बभृषे	बभ्राथे	बभृढ्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	वभ्रे	वभृवहे	वभृमहे
लुट् परस्मै.	भर्ता	भर्तारौ	भर्तार:
	भर्तासि	भर्तास्थ:	भर्तास्थ
	भर्तास्मि	भर्तास्व:	भर्तास्म:
आत्मने.	भर्ता	भर्तारौ	भर्तार:
	भर्तासे	भर्तासाथे	भर्ताध्वे
	भर्ताहे	भर्तास्वहे	भर्तास्महे
लृट् परस्मै.	भरिष्यति[1]	भरिष्यत:	भरिष्यन्ति
	भरिष्यसि	भरिष्यथ:	भरिष्यथ
	भरिष्यामि	भरिष्याव:	भरिष्याम:,
७. अस्याः कक्षायाः सर्वे छात्राः पटवः सन्ति । (विभागवाचकम्) (यस कक्षाका सवै विद्यार्थीहरू चतुर छन्)

८. अस्य मार्गस्य दीर्घता शतगुणा अस्ति । (आवृत्तिवाचकम्) (यस वाटाको लम्वाई सयगुना छ)

९. मदीयः छात्रः कुत्र पठति ? (सर्वनार्मविशेपणम्) (मेरो विद्यार्थी कहाँ पढ्छ ?)

१०. श्यामः पटुः अस्ति । (सामान्यगुणवाचकम्) (श्याम चतुर छ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११. गोपाल: श्यामात् पटुतरो ऽस्ति । (तुलनात्मकं विशेषणम्) (गोपाल श्याम भन्दा चतुर छ)

१२. पर्वतेषु हिमालय: उन्नततमोऽस्ति ।.(अतिशयात्मकं विशेषणम्) (पर्वतहरुमा हिमालय सवै भन्दा अग्लो छ)

उपर्युक्तेषु वाक्येषु रेखाङ्कितपदानि क्रमश: बालकस्य, लिखति क्रियाया:, छात्राणां

सन्यासिन: जलस्य, छात्रयो:, छात्राणाम् , दीर्घताया:, छात्रस्य, श्यामस्य, गोपालस्य, हिमालयस्य

च विशेषतां प्रकटयन्तीति अत: तानि विशेषणानि ।

गुणधर्माकारस्वभावसंज्ञादिभि: यद् विभेदकं तद् विशेषणम् यद् विभेद्यं तद् विशेष्यम् ।

अत्रेदमवश्यमवधेयम्-

" याल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।

तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥ श्लोकस्यार्थस्तु स्पष्ट एव ।

१. गुणक्रियादिवोधकानि

विशेषणम्	विशेष्यम्	विशेषणम्	विशेष्यम्	विशेषणम्	विशेष्यम्
रक्त:	घोटक:	रक्तम्	पुष्पम्	रक्ता	शाटिका
सुन्दर:	वालक:	सुन्दरी	बालिका	सुन्दरम्	पुस्तकम्
प्रथम:	वालक:	प्रथमा	बालिका	प्रथमम्	वय:
महान्	वृक्ष:	महती	बाटिका	महत्	वनम्
धनी	पुरुष:	धनिनी	स्त्री	धनि	कुलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतवान् गतवती गतवत् श्रीमान् श्रीमती श्रीमत्

कृतः कृता कृतम् दीर्घः दीर्घा दीर्घम्

२. संख्याबोधकानि-

विशेपणम्	विशेप्यम ,	विशेपणम्,	विशेप्यम्,	विशेपणम्,	विशेप्यम्
एकः	छात्रः	एका	छात्रा	एकम्	पुस्तकम्
द्वौ	छात्रौ	द्वे	छात्रे	द्वे	पुस्तके
त्रय :	वालका	तिस्रः	वालिकाः	त्रीणि	पुस्तकानि
चत्वारः	वालकाः	चतस्रः	वालिकाः	चत्वारि	पुस्तकानि

३. संख्यावाचकेषु अपरिवर्तनीयस्वरूपाणि विशेषणानि-

पञ्च, पट्, सप्त, अप्टौ, नव, दश, एकादश, द्वादश, त्रयोदश..... एकोनविंशतिः, विंशतिः, एकविंशतिः,...........शतम् ,सहस्रम् ,लक्षम् ,कोटिःइत्यादिः।

विशेषणानां स्थानं प्रयोगश्च -

" विशेषणं विशेष्यात्प्राक् सन्निधाने प्रयुज्यते ।

विशेषतो बोधनीयं पश्चादपि प्रयुज्यते ॥"

प्राक् सन्निधाने प्रयोगस्योदाहरणम् -

१. रक्तं पुष्पम् आनय, । रातो फूल ल्याउ ।

२. महति अरण्ये भयङ्करा जन्तवो भवन्ति । ।ठूलो जंगलमा डरलाग्दा जन्तुहरु हुन्छन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषबोधने तु पश्चात्प्रयो· स्योदाहरणम् -

३ दिनेश: कक्षायां प्रथमोऽभवत् । (दिनेश कक्षामा पहिला भयो)

४ मुकुन्द: श्यामात् पटुतरोऽस्ति ।(मुकुन्द श्याम भन्दा चतुरो छ)

५ मम चत्वारि पुस्तकानि सन्ति । (मेरो चारवटा पुस्तक छन्)

६ त्रय: वालका: अत्र पठन्ति । (तीन बालक यहाँ पढ्छन्)

७. मम तिस्र: भगिन्य: विद्यापीठे पठन्ति । (मेरा तीन बहिनी विद्यापीठमा पढ्छन्)

अभ्यास-२२

निम्नाङ्कितानां वाक्यानां नेपाल्यामनुवादं कुरुत-

१ एक: छात्र आगच्छति ।	२. द्वे बालिके पठत: ।
३. चत्वारि पुस्तकानि आनय ।	४. मम तिस्रो भगिन्य: सन्ति ।
५. देवदत्तस्य चतस्र: कन्या: सन्ति ।	६. रक्तां शाटिकाम् आनय ।
७. कृष्णा गौरागच्छति ।	८. सुन्दर्यो नार्यौ हाटके भ्रमन्ति
९. पटु: शिष्य: प्रश्नान् पृच्छति ।	१०. दिनेशस्य सुन्दरं गृहमस्ति
११. गोपाल अस्या: कक्षाया: सर्वोत्तम: छात्रोऽस्ति ।	१२. द्वौ अपि बालकौ अगच्छताम्
१३. इमानि पुष्पाणि मनोहराणि सन्ति ।	१४. शीला शीघ्रं लिखति ।
१५. श्यामा उच्चै: हसति ।	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निम्नाङ्कितवाक्यानाञ्च संस्कृतेऽनुवादं कुरुत -

१. रातो कलम ल्याऊ ।

२. मेरा तीन भाई छन् ।

३. रामका तीन ओटी बहिनी छन् ।

४. चारवटा पुस्तक कहाँ छन् ?

५. यौटा साधु आएको थियो ।

६. मेरो मान्छे धेरै खान्छ ।

७. दुब्लो केटो रोगी छ ।

८. काली केटी राम्री छ ।

९. ठूला नदीहरूमा राता माछाहरू छन् ।

१०. गरीब मानिसलाई धेरै धन देउ ।

११. धनी मानिसहरू निर्दयी हुन्छन् ।

१२. राम्रो लुगा लगाउ ।

१३. सुशील विद्यार्थीलाई सबै गुरुहरू चाहन्छन् ।

१४. रित्तो भाडामा ताजा घीउ भर ।

१५. दिनेश राम्रा लुगा लगाएर वजार गयो ।

=o=

चतुर्दशपाठः (णिजन्त–कृदन्त प्रयोगः)

प्रेरणार्थकक्रियापदानिः

	मूलधातु	प्रेरणार्थे (णिच)
पठ	पठति (पढ्छ)	पाठयति (पढाउंछ)
लिख	लिखति (लेख्छ)	लेखयति (लेखाउंछ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पा	पिबति(पिउँछ)	पाययति (पियाउँछ)
खाद्	खादति(खान्छ)	खादयति (खुवाउँछ)
शिक्ष्	शिक्षते(सिक्छ)	शिक्षयति (सिकाउँछ)
श्रु	श्रृणोति	(सुन्छ) श्रावयति (सुनाउँछ)
नृत्	नृत्यति(नाच्छ)	नर्तयति (नचाउँछ)
भू	भवति(हुन्छ)	भावयति (हुने गराउँछ)
कृ	करोति (गर्छ)	कारयति (गराउँछ)

एवं प्रकारेण अन्येभ्यो धातुभ्योऽपि णिचप्रत्ययेन प्रेरणार्थो गम्यते ।

प्रेरणार्थक क्रियापदानि आत्मनेपदे, परस्मैपदे च भवन्ति । यथा -

पाठयति	पाठयते, कारयति	कारयते,।
लट् लकारे	पाठयति	पाठयते
लृट् लकारे	पाठयिप्यति	पाठयिप्यते
लोट् लकारे	पाठयतु	पाठयताम्
लङ् लकारे	अपाठयत्	अपाठयत ।

उदाहरणानि वाक्येषु -

१. गुरवः छात्रान् पाठयन्ति ।(गुरुहरू विद्यार्थीहरूलाईपढाउनु हुन्छ)

२. अहं कार्यं कारयामि । म काम गराउँछु ।

३. त्वं निबन्धं लेखयसि । तिमी निबन्ध लेखाउँछौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. माता कथां श्रावयति । । आमा कथा सुनाउनुहुन्छ ।

५. गुरवः पुस्तकं दापयन्ति । । गुरुहरूले पुस्तक दिलाउनुहुन्छ ।

=o=

अभ्यास-२२

निम्नाङ्कितवाक्यानां संस्कृतेऽनुवादं कुरुत

१. म काम गराउँछु । २. गोविन्द स्कूलमा पढाउँछ ।

३. गुरु कथा सुनाउनुहुन्छ ४. वहिनी भाइलाई पढाउँछिन् ।

५. गोपाल पाठ सुनाउ । ६. उसले काम गरायो ।

७. दिनेशले पाठ सुनाएन । ८. आमाले भात खुवाउनु भएन ।

९.तिमीलेभ्रलाई सिकाएनौ १०. हामीहरु तिमीलाई पढाउने छौं ।

पूर्वकालिकी क्रिया (क्त्वा ल्यप्)

समानकर्तकयोः पूर्वकाले ३।४।२१

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद् धातोः क्त्वाप्रत्ययो भवति ।

१. सः वस्त्राणि धृत्वा विद्यालयं गच्छति, । । ऊ लुगा लगाएर विद्यालय जान्छ ।

। अत्र पूर्वं वस्त्राणि धारयति, ततो गच्छति इत्यर्थो विद्यते ।

२. भोजनं कृत्वा पाठं पठ । ३. त्वं दुग्धं पीत्वा क्रीड ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

" समासेऽनञ्पूर्वे क्त्वो ल्यप् " ७ । १।३७

अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात् । यथा- प्रकृत्य प्रहृत्य । उदाहरणम् -

सः वस्त्राणि परिधृत्य विद्यालयम् गच्छति । (ऊ लुगा लगाएर विद्यालय जान्छ) उपरि धृत्वा, अत्र च परिधृत्य, एवं प्रकारेण अन्येष्वपि कतिपयेभ्यः प्रसिद्धेभ्यो धातुभ्यो ल्यप्प्रत्ययान्ताः शब्दाः निर्मेयाः । (क्त्वाप्रत्ययान्ताः, ल्यप्प्रत्ययान्ताः, तुमुन् प्रत्ययान्ताः शब्दा अव्ययान्तर्गताः सन्ति)

धातु	क्त्वा	ल्यप्
पठ्	पठित्वा	प्रपठ्य
नम्	नत्वा	प्रणम्य
गम्	गत्वा	निर्गत्य
पत्	पतित्वा	निपत्य
ओहाक्	हित्वा	विहाय
भू	भूत्वा	संभूय
मन्	मत्वा	अवमत्य
स्था	स्थित्वा	उत्थाय
श्रु	श्रुत्वा	संश्रुत्य
त्यज्	त्यक्त्वा	परित्यज्य
स्मृ	स्मृत्वा	विस्मृत्य
क्षिप्	क्षित्वा	विक्षिप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृ	कृत्वा	प्रकृत्य
शी	शयित्वा	संशय्य
लिख	लेखित्वा	विलिख्य
नी	नीत्वा	आनीय
ज्ञा	ज्ञात्वा	विज्ञाय
हस्	हसित्वा	प्रहस्य

एवंप्रकारेण अन्येषामपि धातूनां क्त्वाप्रत्यये ल्यप्प्रत्यये च रूपाण्यूह्यानि।

उदाहरणानि वाक्येषु -

१. गोपाल ! हाटकं गत्वा पुस्तकमानय । (गोपाल बजार गएर पुस्तक ल्याऊ ।)

२. शीला पुस्तकं गृहीत्वा विद्यालयं गच्छतु । (शीला किताब लिएर स्कूल जाओस् ।)

३. पत्रं लेखित्वा मञ्जूपायां स्थापय । (पत्र लेखेर लेटर वक्समा हालिदेउ ।)

४. जलम् आनीय भोजनं कुरु । (पानी ल्याएर भोजन गर ।)

५. सरस्वतीं प्रणम्य संस्कृतं पठ । (सरस्वतीलाई ढोगेर संस्कृत पढ ।)

६. गृहं गत्वा कार्यं कुरु । (घर गएर काम गर ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास-२४

निम्नाङ्कितानां वाक्यानां संस्कृतेऽनुवादं कुरुत-

१. राम ! घर गएर पैसा ल्याऊ २. मुकुन्द भात खाएर कहाँ गयो ?

३. तिम्री बहिनीले पढेर के गरिन् ? ४. हामीहरु कहाँ वसेर पढौँ ?

५. विद्यालय गएर गुरुलाई ढोग। ६. राम पुस्तक लिएर पढ्न गयो।

७. म भात खाएर तुलसीपुर जानेछु। ८. तिमी यहाँ वसेर काम गर।

९. गोपाल स्कूलमा पढेर घर जानेछ। १०. बजार गएर कपडा ल्याऊ।

तुमुन् प्रत्ययान्ताः शब्दास्तेषां प्रयोगाश्च -

" तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् " ३।३।१०

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्त :। यथा-

कृष्णं द्रष्टुं याति। छात्राः विद्यालयं पठितुं गच्छन्ति।

(अत्र भविष्यदर्थस्य बोधः)

समानकर्तृकेषु तुमुन् ३।३।१५८

इच्छार्थेषु एककर्तृकेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति। यथा -

सः भोक्तुमिच्छति। छात्रःपठितुं पाठशालां गच्छति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचन तुमुन्प्रत्ययान्ता: शब्दा:-

धातु	अर्थ	तुमुन् प्रत्यय:
अर्च्	पूजागर्नु	अर्चितुम् ।
अर्ज्	कमाउनु	अर्जितुम्
कृ	गर्नु	कर्तुम् ।
कथ	भन्नु	कथयितुम् ।
क्री	किन्नु	क्रेतुम् ।
त्यज्	त्याग्नु	त्यक्तुम् ।
दृश्	हेर्नु	द्रष्टुम् ।
गै	गाउनु	गातुम् ।
पा	पिउनु	पातुम् ।
अधि ई	पढ्नु	अध्येतुम् ।
त्रै	रक्षा गर्नु	त्रातुम् ।
चि	जम्मा गर्नु	चेतुम् ।
जि	जित्नु	जेतुम् ।
स्ना	नुहाउनु	स्नातुम् ।

कानिचिद् उदाहरणानि -

१. वालक ! त्वं मातरं द्रष्टुमिच्छसि ? । वालक तिमी आमालाई हेर्न चाहन्छौ ? ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. गोपालः खादितुम् अगच्छत् । (गोपाल खान गयो ।)

३. त्वं शिवमर्चितुमिच्छसि । (तिमी शिवलाई पूजा गर्न चाहन्छौ ।

४ अहं पाठं स्मर्तुं न शक्नोमि । (म पाठ संझन सक्दिन)

५. पार्वति ! पिनाकपाणिं पतिमाप्तुमिच्छसि ? (पार्वति ! भगवान् शंकरलाः पति पाउन चाहन्छयौ ?)

६. इदं कार्यं कः कर्तुं शक्नोति ? (यो काम को गर्न सक्छ ?)

=O=

अभ्यास-७५

निम्नाङ्कितानां वाक्यानां संस्कृतेऽनुवादं कुरुत -

१. विद्यार्थीहरू पढ्न विद्यालय जान्छन् ।२. नेताको भाषण सुन्न जाँदैछु ।

३ उसले तिम्रो काम गर्न सक्छ ?४. गुरु आज काठमाण्डौ जान चाहनु हुन्छ ।

५. विद्या पढ्न गुरुको नजीक जाउ । ६. तिमी गाउन कहाँ जाने छौ ?

७. गुरु हरू विद्यार्थीलाई उपदेश दिन चाहनुहुन्छ ।८. म गीत सुन्न चाहन्छु ।

९. भरतलाई हेर्न राम चित्रकूट गएका थिए । १०. विद्यार्थीहरू सुत्न चाहन्छन्

११. हिजो तिम्रो कामदार काम गर्न आएन ।

=O=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अव्ययम् - (अव्ययानां प्रकारः प्रयोगश्च).

लिङ्गसंख्यादिरहितमव्ययं तच्चतुर्विधम् ।
शब्दयोगि क्रियायोगि योजकं भावबोधकम् ॥

लिङ्गसंख्याविभक्तिरहितम् अव्ययम् । तच्च शव्दयोगि - क्रियायोगि - योजक- भावबोधकभेदेन चतुर्विधं भवति ।

शब्दयोगि- प्र परा अनु अवादयः शब्दयोगित्वेन व्यवह्रियन्ते ।

क्रियायोगि- क्रियायोगीनि अव्ययानि च देशस्य कालस्य प्रकारस्य वाचकानि । बहूनि सन्ति । यथा देशवाचकानि -

यत्र,तत्र,कुत्र,सर्वत्र,यतः,ततः,कुतः,परितः,सर्वतः,अधस्तात् ,उपरिष्टात् ।

उदाहरणं वाक्ये - दिनेशः कुत्र गच्छति । गुरुं परितः छात्राः तिष्ठन्ति । इत्यादि

कालवाचकानि- अद्य, श्वः, परश्वः, सायम्,प्रातः, परुत् , .

उदाहरणं वाक्ये - त्वं प्रातः कुत्र अगच्छः ? पिता अद्य आगच्छति । इत्यादि ।

प्रकारवाचकानि - इत्थम्, कथम् ,यथा, तथा, कथञ्चित, पुनः भूयः ।

उदाहरणम्- इत्थं वदसि त्वं तर्हि दण्डनीयो भविष्यसि । इत्यादि ।

कानिचित् विशेपणानि क्रियाया प्रकारबोधकानि यदा भवन्ति तर्हि तानि

नपुंसक लिङ्गे द्वितीयैकवचनान्तानि भवन्ति । यथा-

स. मुकुन्दं निर्दयं ताडयति । स मन्दं हसति । वानरः सवेगं धावति ।

योजकानि- वा, अथवा, च, अपि यद्यपि तथापि इत्यादि ।

उदाहरणम्- केशवो वा शिवो वा गच्छतु । यद्यपि मम पार्श्वे रूप्यकाणि न सन्ति, तथापि पुस्तकानि क्रेष्यामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावबोधकानि - अहो हन्त धिक् ! । अहो कीदृक् सुन्दरमस्ति वनम् ! । हन्त स गतः ! ।

वाच्यम्

वाच्यम् त्रिविधम्- कर्तृवाच्यम् , कर्मवाच्यम् भाववाच्यञ्च । यदा "लः कर्मणि च भावे चाकर्मकेभ्यः " इति सूत्रेण लकाराः सकर्मकेभ्यः कर्तरि कर्मणि च विधीयन्ते अकर्मकेभ्यश्च कर्तरि भावे च विधीयन्ते तर्हि कर्तरि प्रत्यये कर्ता उक्तो भवति । कर्मणि प्रत्यये कर्म उक्तं भवति ।भावे प्रत्यये भाव उक्तो भवति । यदा कर्मणि लकाराः भवन्ति तदा कर्मण उक्तत्वाद् वाक्यं कर्मवाच्यं भवति । अकर्मकेभ्यो धातुभ्यस्तु भावस्योक्तत्वात् वाक्यं भाववाच्यं भवति । कर्तरि लकारे सति कर्तुरुक्तत्वात् वाक्यं कर्तृवाच्यं भवति । कर्मवाच्ये भाववाच्ये च रूपाणि आत्मनेपदेषु भवन्ति ।उदाहरणे दिग्दर्शनमात्रम् -

	कर्तृवाच्यम्,	कर्मवाच्यम्,	भाववाच्यम्,
सकर्मकात् -	अहं पत्रं लिखामि ।	मया पत्रं लिख्यते	X
अकर्मकात् -	वालकः शेते	X	बालकेन शय्यते।

=O=

पञ्चदशपाठः

निवन्धरचना-शिक्षणम्

भूमिका

अधुना नैपालकेषु वैदेशिकेषु च अनेकेषु विश्वविद्यालयेषु निबन्धरचना तच्छिक्षणञ्च विधीयते । न केवलेषु विश्वविद्यालयेष्वेव विद्यालयेष्वपि सा शिक्ष्यते । न वा तत्रैव. पत्रकारिता क्षेत्रेऽप्यस्या महत्महत्त्वम् । दैनिकसमाचारपत्रेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साप्ताहिकेषु, पाक्षिकेषु, मासिकेषु, षाण्मासिकेषु, मुखपत्रेषु, अनुसन्धानात्मकपत्रिकासु चास्या देशविशेषापरिच्छिन्ना अवाधिता गतिः परिदृश्यते । स्वकीयायाश्शास्त्रीयाया अनुसन्धानात्मिकायाः, अनुभवात्मिकाया धारणाया अभिव्यक्तये सशक्तं साधनं निबन्धरचना नाम । अत एव सर्वत्र प्राप्तावसरत्वमस्याः ।

महेन्द्र-संस्कृत विश्वविद्यालये पाठ्यमानेषु भाषावर्गीय- काव्यवर्गीय- दर्शनवर्गीयेषु च पाठ्यवस्तुषु सर्वत्रापि निबन्धः प्राप्तावसरः । अत्र विश्वविद्यालये उत्तरमध्यमस्तरे प्रविविक्षूणां संस्कृतमविदुषां प्रशिक्षमाणानां छात्राणां कृतेऽपि निबन्धरचनाशिक्षणं निर्धारितम् । अनेन च संस्कृतभाषाज्ञानं ज्ञातानां विषयवस्तूनामभिव्यक्तिः, लेखनसामर्थ्यम्, सुलेखश्च अभीप्सितानि । एषां लक्ष्याणां प्राप्तयेऽत्र श्रमः कार्य एवच्छात्रैः ।

निबन्धानामुत्पत्तिः

कस्या अपि भाषाया उपयोगः प्रकारद्वयेन भवति, भाषणेन लेखनेन च । भाषणेनापि स्वीया विचाराः प्रकटयितुं शक्यन्ते । परं ते स्थायिनो न भवन्ति । तान् सञ्चितान् सुरक्षिताँश्च कर्तुं भाविसमयस्य सम्पदां विधातुञ्च लेखनं निबन्धनं वा अतीवावश्यकम् । निबन्धनेन मानवजातिनां विचारा अनुभवादयश्च सुरक्षिताः समाजोपयोगिनश्च भवन्ति । प्राचीने काले मुद्रणसौविध्यमाधुनिके समय इव नासीत् विकसितं सुलभञ्च । अतो विद्याविषयिणोऽनुसन्धाने, धार्मिकव्यवस्थापने, दर्शनादिलेखने च भूर्जपत्राणामुपयोगं कुर्वन्ति स्म । तत्र स्वविचारान् लिपिबद्धान् च कुर्वन्ति स्म । भूर्जपत्रेषु वस्त्रखण्डेषु च नैजा विचाराः सुरक्ष्यन्ते स्म । लिखिताश्चेमाः सामग्रीः सम्वेष्ट्य बद्ध्वा वा रक्षन्ति स्म दूरदर्शिनो लेखकाः। एवं निबद्धास्ते विचाराः कालान्तरे " निबन्ध " इति शब्देन लब्ध प्रसिद्धयोऽभूवन् ।

विचाराणां क्रमिकं ग्रथनम्, बन्धनम, सज्जीकरणम् ग्रहणञ्च बोधयन् निबन्धशब्दः प्राचीने संस्कृत वाङ्मये धार्मिकाणं तत्वानां निबन्धको दृश्यते । इदानी तु धार्मिकेतराणां तत्वानां निबन्धनेऽपि निबन्धशब्दस्य प्राचुर्यं व्यवहारश्च दृश्यते । इदानीं निबन्धो वैषयिकबन्धनहीनः प्रज्ञाप्रयासः सम्मन्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवन्धानां महत्वम्

स्वल्पेन लेखेन अधिकबोधो विशिष्टता प्रकृतिः । वैयाकरणाः आलङ्कारिकाः, दार्शनिकाश्च लाघवं वाग्व्यवहारचातुरीं मन्यन्ते । तेषां लिखितेन लघुना वाग्व्यवहारेण इदानीमपि जना आनन्दान् अनुभवन्ति । इमामेव भावनामादधानो निवन्धशब्दः । अतएव महन्महत्वं रक्षति इदानीमपि ।

निवन्धानां विषयाः परिच्छेत्तुं न शक्यन्ते । पिपीलिकातो हस्तिपर्यन्तम्, सर्षपतो गिरिराजपर्यन्तम्, जीवतो ब्रह्मपर्यन्तम् , भौतिकविषयत आध्यात्मिकविषयपर्यन्तम् , ये केऽपि निवन्धस्य विषया भवितुं शक्नुवन्ति । परन्तु तत्र स्ववैशिष्ट्यन्तु स्यादेव । एवं प्रतिपाद्यस्य विषयवस्तुनो वास्तविकाकारप्रदर्शनेन सह तत्र स्ववैशिष्ट्यप्रदर्शनञ्च निवन्धस्य महत्वम् लक्ष्यञ्च । तेन निवन्धेन प्रतिपाद्यवस्तु सुरक्षितं भवति। तेन च देशः समाजो जनश्चोपकृतो भवतीति सार्वजनीनं तन्महत्वम् ।

निबन्धलक्षणं तद्भेदाश्च

कस्यापि वस्तुनो ज्ञानार्थं तस्य लक्षणं परिभाषा वा देयम् भवति । अतो निबन्धस्यापि स्वरूपज्ञानार्थं तस्य सामान्यं लक्षणं देयमेव ।

(१.) कञ्चिद् विषयमवलम्ब्य स्वाभिप्रायस्य, स्वविमर्शस्य स्वसंयोजनस्य च लेखेन सज्जीकरणं निवन्धः ।

(२.) कस्मिंश्चिद् गहने साधारणे वा विषये वैदुष्यपूर्णैर्विचारैर्युक्तस्य स्वमतस्य विस्तृतेन लेखेन सज्जीकरणं वा निवन्धः। विचारा निबन्धानां प्राणाः सुबोधा शैली च तच्छरीरम् । यथा प्राणरक्षायै स्वस्थस्य शरीरस्यावश्यकत्वं तथैव विचाररूपाणां प्राणानां रक्षायै सुव्यवस्थितायाः सरसायाः सुबोधाया वर्णनशैल्याश्चावश्यकत्वं भवति ।

निवन्धप्रणयने तल्लेखकेन इदमवधेयम् -

१. निबन्धस्य प्रारम्भे भूमिका अवतरणिका वा स्यात्, यत्र तस्य महत्वं परिचय आवश्यकता वा उल्लिखितं स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. मध्ये निबन्धशरीरम् , यत्र स्वमतं स्वलेख्यं च सम्पूर्णमागतं स्यात्। ततश्च अन्ते -

३. उपसंहारः निष्कर्षो वा स्यात्, यत्र निबन्धस्य सारो भवेत् ।

एषु त्रिषु तथ्येषु विशेषेण निबन्धशरीरे च इमानि पालनीयानि तत्वानि अवधेयानि च -

१. विषयस्य ऐक्यम्

निबन्धे हि एकं खलु प्रतिपाद्यं स्यात् प्रामुख्येन । तदेवैक्यं स्वसमर्थनेन स्वाभिप्रायेण वा पूर्णतां प्रापयेन्निबन्धलेखकः । असम्बद्धं नापेक्ष्यं सम्वद्धञ्च नोपेक्ष्यमेव तेन ।

२. क्रमः -

निबन्धे प्रतिपाद्यानां विषयाणां क्रमिकता नापलपनीया । क्रमव्यत्यासेन अक्रमेण वा लेखने प्रतिपाद्यं प्रतिपादयितुं न शक्यते प्रकृतेन निबन्धेन । सिद्धान्तस्थापनेन निबन्धसमाप्तिक्रमं न विस्मरेन्निबन्धकः ।

३ सङ्क्षेप :-

लम्वेनैव निबन्धेन अधिका विचाराः प्रकटयितुं शक्यन्ते ,अधिकाश्चाङ्गा लब्धुं शक्यन्ते इति विचारो मिथ्या । नातिदीर्घेणापि तेन सुगठितेन बह्वर्थबोधनसमर्थशब्दशरीरेण अधिका अर्थाः अधिकाश्चाङ्गाः प्रशंसाश्च ल... शक्यन्ते, अप्रकृतार्थेन वाक्प्रपञ्चेन निबन्धकलेवरवर्धनेन

न कोऽपि लाभः किन्तु हानिरेव, समयश्रमादेर्व्यर्थप्रयोगात । अतः सङ्क्षेपो नोपेक्ष्येत।

४. शैली -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयञ्च स्फुटा, मधुरा, प्रसादसम्पन्ना मनोहारिणी च स्यात् । सरलानां प्रचलितानाञ्च शब्दानां प्रयोगः स्यात् । अलङ्काराणामपि प्रयोगश्चेत् साधु । परं शब्दालङ्कारप्रियता चोद्वेगकरी रसिकानामिति सा नात्याद्रियेत ।

५. स्वकीयता-

निबन्धो निबन्धलेखकस्य स्वकीयानां विचाराणां प्रतिबिम्बोपस्थापको भवेत् । स्वकीयताया अभावे निबन्धस्य रुचिर त्वं न स्यात् नीरसता तु स्यात् नवीनताया अभावात् । तस्मात् मर्यादितं शास्त्राविरोधि च स्वाभिप्रेतं परेषामभिमतमनभिमतं वा मुक्तसंशयमुपवर्णयेत् । पराभिप्रेतपुनरुक्त्या नात्मनः कृतित्वं संमन्येत । यन्निबद्धन्तत्र स्वस्य दृढो विश्वासो व्यहारश्च स्यात् । अत इदं माघोक्तं परिशीलनीयम् -

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।

अनुज्झितार्थसम्बन्धः प्रवन्धो दुरुदाहरः ॥ इति

<u>निबन्धभेदाः</u>

निबन्धकाराणां तत्स्वभावानाञ्चानन्त्यात् निबन्धभेदा अपि अनन्ताः, अथापि प्राधान्यात् व्यवहारसारल्याय पञ्चविधास्ते सम्मन्यन्ते । -

१. विचारात्मका : २. आख्यानात्मकाः । ३. वर्णनात्मकाः । ४. कल्पनात्मकाः । ५. गुणदोषविवेचनात्मकाश्च ।

१. विचारात्मकाः -

एपु निवन्धेपु तर्कानुमानाभ्यां सूक्तिभिर्दृष्टान्तादिभिश्च स्वाभिप्रायस्य प्रकटनं समर्थनञ्च विधीयते । १. देशभक्ति :२. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ३. स्मृतिमहिमा ४. संस्कृतस्योपयोगिता । ईदृशा विषया एतद्विभागस्यानुकूला : ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. आख्यानात्मकाः-

आख्यानात्मकेपु निबन्धेषु किमपि वृत्तं वर्ण्यते । अत्र सविवेकं वृत्तं वर्णयन् निबन्धकर्त्ता कथमिदं संवृत्तम्, इदं जनानां हिताय, अहिताय वाऽभूत्, किमिदं साधु विहितम् असाधु वा ?, किमिदं परिहार्यम् अपरिहार्यं वेति यथातथं विदेचनीयम् । अत्र इमे विषया भवितुमर्हन्ति ।

१. सुगौली-सन्धिः २. नेपालचीनयुद्धम् ३. श्री ५ पृथ्वीनारयणवृत्तम् ४. श्री शङ्कराचार्यस्यात्मकथा । ५. नैपालकाङ्गलयोः काँगडायुद्धम् । ६. गौतमबुद्धचरितम् । एवमन्येऽपि ।

३. वर्णनात्मकाः -

एषु स्वदर्शनाधारेण स्वानुभवाधारेण स्वाध्ययनाधारेण वा विषया वर्ण्यन्ते । अत्र, १. अरुणोदयः २. पशुपतिनाथः ३. ग्राम्योत्सवः ४. विजयादशमी ५. दीपावली इत्यादयो विषया भवितुमर्हन्ति ।

४. कल्पनात्मकाः -

यत्र अननुभूता विषयाः केवलं कल्पनाबलेन, उत्प्रेक्षया च निबध्यन्ते, वर्ण्यन्ते च ते कल्पनात्मका निब न्धा भवन्ति ।

१. नौकाविहारः २. यद्यहं शिक्षामन्त्री भवेयम् ३. जीर्णस्य छात्रस्यात्मकथा ४. यद्यहं कोटिपतिर्भवेयम् । इत्येवमादयो विषया अस्य भेदस्य विपया भवन्ति । अयं भेद आत्मपरक इत्यप्युच्यते ।

५. विवेचनात्मकाः -

अत्र कवीनां लेखकानां निबन्धकाराणां नाटककाराणामुपन्यासकाराणां कथादिकाराणामन्येषां ग्रन्थकृतां वा कृतयो गुणोद्देशेन दोषोत्कीर्त्तनेन च विविच्यन्ते ,। अत्र व्यङ्ग्यार्थस्य प्राधान्यम्, वाच्यार्थस्येति वा विविच्यते । शब्दाडम्बरोऽर्थगौरवं वेति परीक्ष्यते । को रसोऽत्र अङ्गी, कश्च के वा अङ्गानि इति च निर्धार्यते । चरित्र-चित्रणम् ,कृतौ प्रयुक्तानां शब्दानां समीसक्षणञ्च विधीयते । रचनाकृतिसम्वन्धी कोऽपि विपयोऽत्र विपयो भवति । अयं भेद आलोचनात्मक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यप्युच्यते । एपु कस्यापि विभागस्यस्यानुकूलेषु निबन्धेषु निबन्धनीयेषु विपयैक्यम्, क्रमः, संक्षेपः, शैली ,स्वकीयता च तच्छरीरे पालनीयानि एव ।

=०=

अभ्यासः

प्रश्नाः

१. निबन्धरचनाभ्यासस्य किमुद्देश्यम् ?

२. निबन्धानामुत्पत्तिः कथं जाता ?

३. निबन्धानां किं महत्वम् ? तेषां विषयाः कथन्न परिच्छेत्तुं न शक्यन्ते ?

४. निबन्धलक्षणं किम् ?

५. प्रत्येकं निबन्धे त्रयो भागा भवन्ति के ते ?

६. निबन्धे निबन्धनीये परिपालनीयानि तत्वानि कानि ?

७. निबन्धभेदाः के ? तत्र आख्यानात्मकेऽनुकूलाः पञ्च विषयाः कल्पनीयाः।

८. कस्य भेदस्य को विषयो भवितुमर्हति ? परस्परं मेलयत -

क. विचारात्मकः	क. यद्यहं कोटिपतिर्भवेयम् ।
ख. आख्यानात्मकः	ख. कृतिसमीक्षणम् ।
ग. वर्णनात्मकः	ग. देशभक्तिः ।
घ. कल्पनात्मकः	घ. दीपावलिः ।
ङ विवेचनात्मकः	ङ सुगौली सन्धिः ।

=०=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निबन्धरचना

निबन्धलेखनाभ्यासाय विभिन्नानि बिंशतिर्निबन्धशीर्षकाणि पाठ्यक्रमे निर्दिष्टानि । तेषु शीर्षकेषु निबन्धलेखन सौकर्याय प्रत्येकं निर्धारिते शीर्षके प्रशिक्षणमुखेन निदर्शनरूपेणच केचन बिन्दवः (प्वाइण्ट्स्) कल्पिताः ।ताननुपेक्षमाणै श्छात्रैर्निबन्धा निबन्धनीयाः ते च यथाक्रमं यथाशीर्षकञ्चेमेऽधः प्रस्तूयन्ते ।

१. संस्कृत–वाङ्मय–परिचयः

१. भूमिका २. वाङ्मयलक्षणम् ३. संस्कृतवाङ्मयस्य महत्वम् ४. संस्कृतवाङ्मये वर्त्तमानाः ज्ञानविज्ञानसम्बद्धा विषयाः ५ संस्कृतवाङमयस्योपेक्षा तत्परिहारश्च ६. उपसंहारः ।

२. संस्कृतस्योपयोगिता

१. संस्कृतभाषायाः परिचयः २. सस्कृतभाषायाः महत्वम् ३. संस्कृतस्य शब्दसम्पत्तिः ४. नेपालीभाषाया नेपालस्य भाषिकाणाञ्च संपोषकत्वम् ५. प्राविधिकप्रशासनिकादिशब्दनिर्माणनिपुणत्वम् ६. अत्रत्यव्यावहारिक विषयाणां प्रकाशनम् । ७. उपसंहारः ।

३. स्मृतिमहिमा

१ स्मृतेर्लक्षणम् २. स्मृतीनां संख्या ३. स्मृतिपु वर्णिताः प्रमुखा विषयाः ४. सर्वेभ्यो व्यावहारिकी स्मृतिः ५. इदानीं स्मृतेरुपयोगिता ६. उपसंहारः ।

४. वेदवैशिष्ट्यम्

१. वेदानां परिचयः २. वेदानां संख्या पौर्वापर्यञ्च ३. वेदप्रतिपाद्यानि कर्माणि ४. वेदानामिदानीमप्यावश्यकत्वम् ५. वेदानां प्रामाण्यम ६. उपसंहारः ।

५. संस्कृत–व्याकरणस्य परिचयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. व्याकरणस्य प्रारम्भः ३. व्याकरणस्य लक्षणम् ३. व्याकरणस्यावश्यकत्वम् ४. पाणिनीय–व्याकरणस्य सर्वोत्कृष्टत्वम् ५. व्याकरणस्य शब्दग्रन्था अर्थग्रन्थाश्च ६. पाणिनीयव्याकरणस्य व्याख्याद्वयम् । ७. उपसंहारः ।

६. संस्कृत साहित्यम्

१. संस्कृत साहित्यस्य परिचयः २. तस्योपयोगित्वं प्रयोज़नानि च ३. अत्र वर्णिता विषयाः ४. संस्कृत साहित्यस्योद्देश्यम् ५. नेपालीभाषासाहित्ये संस्कृतसाहित्यस्य प्रभावः ६. उपसंहारः ।

७. नेपाले तन्त्रपरम्परा

१. तन्त्र परिचयः: २. तन्त्रलक्षणम् ३. तन्त्राणामुपयोगः ४. नेपाले तन्त्रपरम्परा प्रभावश्च ५. तान्त्रिकी पूजा ६. नेपाले तन्त्रकाराश्च ७. उपसंहारः ।

८. नैपालकजनजीवने पुराणानां प्रभावः-

१. पुराणलक्षणानि २. पुराणानां संख्या ३. पुराणानां महत्त्वम् ४. पुराणप्रभाविता अस्मज्जीवनपद्धति : ५. नेपालसम्बन्धीनि पुराणानि ६. पुराणेषु नैतिकता स्वावलम्बनञ्च ७. उपसंहार :

९. महेन्द्र- संस्कृत- विश्वविद्यालयः

१. ,संस्कृतविश्वविद्यालयस्य पृष्ठभूमि : २. महेन्द्र संकृतविश्वविद्यालयस्यावश्यकत्वम् ३. अस्य स्थापनाकालः ४. अस्य उद्देश्यानि ५. छात्रसंख्याया नैयून्यं परिहारोपायाश्च ६. जनरुचेरभावकारणानि ७. अस्य कर्त्तव्यानि ८ उपसंहारः

१०. संस्कृतस्योत्थानोपायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. संस्कृत-परिचयः २. संस्कृतस्य महत्वम् ३. अत्र जनानामनभिरुचौ कारणानि तत्परिहारोपायाश्च । ४. छात्रसंख्याया वृद्ध्युपायाः । ५. पाठ्यक्रमस्य पाठ्यपुस्तकानाञ्च सरलीकरणम् । ६. शिक्षकप्रशिक्षणम् । ७. अत्रत्यानां प्राविधिकविषयाणां समावेशनम् । ८. सर्वेषां कृते संस्कृतज्ञानस्यावश्यकत्वम् । ९. उपसंहारः।

११. अनुशासनम्

१. अनुशासनस्य लक्षणं परिचयश्च । २. अनुशासनस्य महत्वम् । ३ अस्य अभावस्तत्र कारणानि च ।

४. कस्याप्युन्नतौ अस्य परमावश्यकत्वम् । ५. छात्रावस्थायामस्य महन्महत्वम् । ६. उपसंहारः।

१२. लोकतन्त्रस्य महत्वम् -

१. लोकतन्त्रस्य परिचयः । २. लोकतन्त्रस्य महत्त्वम् । ३. लोकतन्त्रस्य परिभाषा । ४. प्राचीनशासनपद्धतिः । ५.लोकतन्त्रस्य स्थापना । ६. अस्य लाभाः । ६. अस्य दोषाः । ८. उपसंहारः ।

१३. पशुपतिनाथः

१. भूमिका । २. अस्य स्थापना । ३. शिवलिङ्गस्य मन्दिरस्य च परिचयः । ४. पशुपतिनाथस्य महत्त्वम् । ५. अस्य राजाश्रयत्वम् । ६. हिन्दुजनानां तीर्थस्थलत्वम् । ७. वाग्मत्याः शुद्धीकरणम समृद्धीकरणञ्च । ८. अत्रावश्यं कर्त्तव्यानि । ९ उपसंहारः

१४. जन्मभूमिः

१. भूमिका २. जन्मभूमेर्महत्वम् ३. शास्त्रेषु जन्मभूमिप्रशंसनम ४. जन्मभूमेर्महत्वगानस्य रहस्यम् ।

५. देशविकासाय जन्मभूमेर्महत्वगानस्यावश्यकत्वम ६. उपसंहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५. अस्माकं हिमालयः

१ भूमिका २. हिमालयपरिचय. ३. अस्य सर्वोच्चत्वम् ४. अस्य पर्यटकाकर्षकत्वम् ५. अस्य जलसम्पदाया मूलत्वम् ६. हिमालयपरिसरे जातानि प्रदूषणानि तत्परिहारश्च । ७. आर्थिकस्रोतोरूपेण अस्य संरक्षणम् ८. उपसंहारः।

१६. वसन्तर्तुः

१ भूमिका २. ऋतुपरिचयः ३. वसन्तर्तोर्महत्त्वम् ४. साहित्ये वसन्तर्तुवर्णनम् । ५. अस्य महत्त्वे कारणानि ६. नेपाल्यां वसन्तर्तुवर्णनम् ७. उपसंहारः ।

१७. शारदी शोभा

१ भूमिका २. ऋतुपरिचयः ३. शरदः शोभायमानत्वे कारणानि ४. शरदि दुर्गापूजनम् ५. विजया–दशमी दीपावली च ६. उपसंहारः ।

१८. विद्यामहिमा

१. भूमिका २. विद्याशव्दस्य व्युत्पत्तिरर्थश्च ३. विद्याभेदौ ४. विद्यामहत्त्वम् ५. छात्रेषु विद्यायाः (ज्ञानस्य) स्थितिः ६. प्राविधिक्याः शास्त्रीयायाश्च विद्यायाः समुन्नतिप्रदत्वम् ७. इदानीं राजनीतिप्रभावेण विद्यायां ह्रासः, तत्परिहारोपायाश्च । ८. उपसंहारः ।

१९. वसुधैव कुटुम्वकम्-

१. भूमिका २. वसुधाशव्दार्थः ३. कुटुम्वपरिचयः ४. अस्य व्यावहारिकं महत्त्वम् ५. नागरिके जीवनेऽस्याभावस्तत्परिहारोपायाश्च ६. उपसंहारः ।

२०. सत्सङ्गतिः

१. भूमिका २.सत्सङ्गतिशब्दार्थः ३. सत्सङ्गतेर्महत्त्वम् ४. सत्सङ्गतेर्लाभाः ५. उपसंहारश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निदर्शनरुपेण शीर्षकद्वये निबन्धौ लिखितौ वर्तेते । छात्रा तद्वत् अन्यान्यपि निबन्धान्निबद्धुं शक्नुवन्ति ।

१. संस्कृतस्योपयोगिता:

१. संस्कृतस्य परिचय:

संस्कृतम् इति नामकरणैनेव संस्कृतस्य संस्कृतत्वम् । अत्र आधुनिक भाषान्तरवत् अन्यभाषाशब्दसङ्कीर्णता नास्ति, स्वसमृद्धयैव सिद्धेरित्यस्य संस्कृतत्वम् । संस्कृतानां देवानामपीयं भाषा इत्यनेनापीयं संस्कृता भाषा । अस्माकम् मूल्यनिधिरुपाणां वेदानाम् अस्माकं जीवनपद्धतौ आधारितानां पुराणानामन्येषां काव्यग्रन्थानाम् आयुर्वेद-ज्योतिषादि - व्यावहारिकविषयाणां संस्कृतवाङ्मयस्य मुखरूपाणां व्याकरणानाम् अन्येषामस्मज्जीवनसम्बद्धानां धर्मशास्त्रादीनाञ्च संस्कृतमेव भाषा इति नास्य परिचयस्तिरोहित: सर्वेषाम् । इयमस्माकं पूर्वजानां भाषा इति अस्मद्रक्तेन सम्बद्धेति परिचिताप्यपरिचितेव चेदानी पाश्चात्यचाकचक्यात् । अस्मज्जन्मतो मरणपर्यन्तमियं भाषा अस्मत्सम्बद्धेति नास्त्यधिकपरिचयस्यावश्यकता । इयं समृद्धा पुराणी च भाषा देवानाञ्च भाषा इत्येव नापेक्ष्या इयम, किन्तु ज्ञानविज्ञानसम्पन्ना, अस्मत्पूर्वजानां व्यावहारिक-शास्त्रीय- आध्यात्मिकस्य विचारस्य निधिरिति परिचेतुं शक्यते इयं भाषा ।

२. संस्कृतस्य महत्वम्

वयं पूर्वीयदर्शनानुयायिन: । अस्माभिर्भौतिकी उन्नतिरेव नापेक्ष्यते किन्तु आध्यात्मिकी अपि । तस्योभयस्य कृते संस्कृतं विना न किमपि साधनमस्माकम् । संस्कृतमेका भाषा , या खलु वेदेषु , पुराणेषु अन्येषु च विविधेषु विषयेषु भाषारूपेण प्रयुक्ता । अतस्तेषां विषयाणां ज्ञानाय तेषां व्यवहारे समाचरणाय अतीवावश्यकमिदानमिं । तानि च कर्माणि तेषामध्ययनम् , मननं, परिशीलनम्, अनुवदनञ्चापि संस्कृतज्ञेन विना न संभवन्तीति संस्कृतस्य तज्ज्ञानस्य च महत्त्वं दिनेषु सूर्यस्य सत्ता इव

अनपलपनीयम् । वैदेशिकानां कृते संस्कृतस्य स्वल्पं महत्त्वं स्यान्नाम अस्माकं कृते तु महन्महत्त्वम् । अस्मामिराध्यात्मिकी, नैतिकी, चारित्रिकी अभ्युन्नतिरभिलप्यते इत्येतदर्थ संस्कृतमनल्पमहत्त्वम् । वैदेशिका विद्वांसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मैक्समूलर-मैकडोनलप्रभृतयोऽपि संस्कृतं प्रशंसन्ति एतदीय सामर्थ्यदर्शनेन । संस्कृत वाङ्मयस्य मूलभाषात्वेन, दार्शनिकविषयभाषात्वेन शब्दशेवधिवर्धकत्वेन चास्य महत्त्वमतिरोहितमेव।

३ शब्दसम्पत्तिः

शब्दाः खलु भावाभिव्यक्तये अत्यावश्यकाः । अत्र चैकस्य अर्थस्य प्रतिपादनेऽनेके शब्दाः सन्तीति अस्य वैशिष्ट्यम् । अत्र व्याकरणं बैज्ञानिकं सम्पन्नञ्च । एतदीयव्याकरणे हि अनेकं धातवः शब्दानां प्रकृतित्वेन कल्पिताः सन्ति । अनेके च प्रत्यया उपसर्गाश्च अनेकेषु धातुषु अनेकेषु प्रत्ययेषु संयुक्तेषु तेषु च विभिन्नोपसर्गाणां संयोजनेन अनन्ताश्शब्दा निष्पद्यन्ते इति शब्दसम्पतिः संस्कृतस्य महती विशेषता । शब्दशेवधिवर्धकत्वेन संस्कृतस्य सर्वादरणीयता च ।

४. नेपाली भाषायाः भाषिकान्तराणाञ्च सम्पोषकत्वम्

नेपाली- हिन्दी- मैथिली- नेवारीप्रभृतयो भाषाः संस्कृताज्जातास्तत्सम्बद्धाश्च । अतः संस्कृतभाषा तासां जननी सम्वर्धिका च । नेपाली-हिन्दी-मैथिल्यादिषु भाषासु पञ्चसप्ततिप्रतिशतं (७५%) शब्दाः संस्कृतस्य प्रयुज्यन्ते इति तासां सम्पोषिकात्वं सर्वसम्मतम् । इदानीं नेपाल्यादिभाषाणां लेखकाः कवयश्च संस्कृताध्ययनेनैव संस्कृतस्य ज्ञानेन च ख्यातिङ्गताः प्राप्तादराश्च इति सफल-साहित्यलेखनाय संस्कृतमनुपेक्षणीयम् । नेपाले वर्त्तमानानां विभिन्नानां भाषिकाणामपि संस्कृतं पोषकमेवेति तत्र तत्र भाषिकासु प्रयुक्तानां संस्कृत-तत्समशव्दानां बाहुल्येन कृतप्रयोगाणां दर्शनेन स्पष्टं भवति । अस्माकं शिक्षामन्त्रालयादेर्विश्वविद्यालयानां च लक्ष्यमस्ति नेपाली-भाषायामाङ्गलभाषास्थ-प्राविधिक–वैज्ञानिक प्राशासनिकादिशब्दानामनुवादकरणम् । तत्सिद्धये संस्कृतस्य शब्दसम्पत्तिरतीवोपयोगिनी भविष्यति । आङ्गलादिभाषास्थवैज्ञानिकशब्दानां सदैव प्रयोगे तु सर्वोपयोगित्वं तस्य न स्यात्, स्याच्च दासतायाः सूचकः अतः संस्कृतस्य भाषान्तर-सम्पोषकत्वमेव ।

५. व्यावहारिकविषयाणां प्रकाशनम्

संस्कृतस्योपयोगितायै संस्कृतस्थव्यावहारिकविषयाणां अध्ययनाध्यापने अनुसन्धानञ्च आवश्यकानि । केवलेन व्याकरणस्य सहित्यस्य न्यायादेश्चाध्ययनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतस्योपयोगिता न भविव्यति । आयुर्वेद- ज्योतिष- स्थापत्य- कृषि विद्यानां प्रकाशने समाज उपकृत आकृष्टश्च भविष्यतीति संस्कृतस्योपयोगिता बर्धिष्यते ।

६. उपसंहार:

स्वसमृद्धिबलेन संस्कृतं भाषान्तरशब्दसङ्कीर्णताऽभाववत् । अस्मद्रक्तेन सम्बद्धमिदम् । वेदभापात्वेन पुराणादिभापात्वेन चेदं नोपेक्षणीयम् । संस्कृत-वाङ्मयज्ञानेन स्वस्य, समाजस्य, देशस्य भौतिक्यै आध्यात्मिक्यै च समुन्नत्यै संस्कृतमुपयोज्यम् । नेपाल्यादिभाषासु नेपाल-भाषिकासु च वैदुष्यार्थं समृद्ध्यर्थं च तत् अध्ययनीयम् । संस्कृतस्य व्यावहारिकाणां विषयाणामुपयोगेन माध्यमिकशिक्षापर्यन्तं सर्वेषां कृते संस्कृताध्ययनस्य तज्ज्ञानस्य च वातावरणविधानेन च संस्कृतस्योपयोगिता वर्धिता भविष्यतीति ।

=o=

२. संस्कृत-व्याकरण-शास्त्रस्य परिचय:

१. व्याकरणस्य प्रारम्भ: -

मुखं व्याकरणं प्रोक्तमिति उक्त्या संस्कृतव्याकरणं संस्कृत-वाङ्मयशरीरस्य मुखं मन्यते । शरीरे मुखस्यापरिहार्यं महत्त्वमिव संस्कृत-वाङ्मये संस्कृतव्याकरणस्य महन्महत्त्वम् । स्वविचारा द्विधा प्रकटिता भवन्ति । भाषणेन लेखनेन च । भाषणं चिरस्थायि न भवति । लेखनन्तु चिरस्थायि भवति । विचाराणां स्थायितायै पूर्वं भूर्जपत्रादिषु लेखनं प्रारब्धम् । तेषु लेखेषु प्रयुक्ताया भाषाया: [illegible]ाञ्चापरिवर्तनीयतामेकरूपताञ्चानेतुं व्याकरणं लिखितम् । अथ च पूर्वस्मिन् समये श्रवणेनैव विषया: कण्ठस्थीक्रियन्ते स्म । अत एव वेदा: श्रुतयो भण्यन्ते । तत्र स्वराणामारोहावरोहयो: पार्थक्यम, उच्चारणभिन्नता चागतम् । तदसहमाना महर्षयो व्याकरणमरचयन् । अस्य प्रारम्भस्तु जगत्सृष्टिसमकालिक एव , " बह्मा बृहस्यतये प्रोवाच "इत्युक्त्या ब्रह्मकर्तृक: संस्कृतव्याकरणस्य प्रारम्भ: इति इतिहासविद: । ब्रह्मणा सृष्टस्य व्याकरणस्य लिपिबद्धकरणन्तु इन्द्रेण कृतम् । व्याकरणस्यावश्यकतामनुभूय देवा इन्द्रमुपागत्य ऊचु: कुरु व्यारकणमिति । इन्द्रश्च व्याकरवाणि इति प्रतिज्ञाय महद् व्याकरणं व्याचकार । अत एव महाभारतस्य टीकाकारेण देवबोधेनोक्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यान्युज्जहार माहेन्द्रात् व्यासो व्याकरणार्णवात् ।

पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे ॥ इति

२. व्यकरणलक्षणम्

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम् शब्दव्युत्पत्तिसाधनमित्यर्थः । अयं शब्दव्युत्पत्तिगम्योऽर्थः । भाष्यकारस्तु "लक्ष्यलक्षणे व्याकरणम् इति । अतो "लक्ष्यलक्षणसमुदितं व्याकरणम्" न शब्दमात्रं न वा सूत्रमात्रम् । आधुनिक भाषाव्याकरणग्रन्थेषु च पूर्वं नियमाः (सूत्राणि) दीयन्तेऽथ चोदाहरणानीति लक्ष्यलक्षणे व्याकरणमुचितम् । संस्कृतव्याकरणञ्च साध्वनुशासनमुच्यते । अत एवेदं प्रायेण साधुष्वेव शब्देषु प्रवर्तते । एवञ्च सूत्रम, उदाहरणम, सूत्रव्याख्यानं प्रत्युदाहरणञ्च समुदितं व्याकरणलक्षणम् अवधेयम् ।

३. व्याकरणस्यावश्यकत्वम्

सर्वास्वपि समृद्धासु व्यापिकासु च भाषासु व्याकरणम् अस्ति । अत एव आधुनिकासु नेपाली- हिन्दी- मैथिली प्रभृतिषु भाषासु व्याकरणमस्ति लिखितम् , का नाम कथा प्राचीनासु व्यापकतरासु संस्कृतप्रभृतिभाषासु । व्याकरणं हि भाषाया रक्षककवचं भवति । यथा कवचेन सुरक्षितो योद्धा स्वकार्यं निर्विघ्नं निर्वर्तयति शत्रूँश्च विजयते तथैव व्याकरणेन रक्षिता भाषा बहुकालं यावत् अपरिवर्तनीया प्रत्यग्रा च संरक्ष्यते । अत एव व्यासकालिकं वाल्मीकिकालिकञ्च संस्कृतमिदानीमपि अविकृतमस्तीति तत्रत्यानि पदानि श्लोकाश्चेदानीमपि सारल्येन बुध्यन्ते, अर्थाप्यन्ते च । संस्कृत व्याकरणस्य माहात्म्येन इदानीमपि वेदा अपि बुध्यन्ते । साधुभाषणाय लेखनाय च व्याकरणमत्यावश्यकम् । अत एव सीता आह वाल्मीकीयरामयणे-

"कृत्स्नं व्याकरणं नूनमनेन बहुधा श्रुतम्" ।

बहु व्याहरताऽनेन न किञ्चिदपभाषितम् ॥

इति हनुमन्तमुद्दिश्य । एवं संस्कृतस्य तद्व्याकरणस्य चाध्ययनमतीवावश्यकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. पाणिनीयव्याकरणस्य सर्वोत्कृष्टत्वम्-

अशीतिसंख्यापरिमिताः प्राचीनाः संस्कृतव्याकरणकर्त्तार इतीतिहासविदः । परन्तु पाणिनेरादर्शभूता दश वैयाकरणाः । तेच आपिशलि-काश्यप-गार्ग्य- गालव -चाक्रवर्मण-भारद्वाज- शाकटायन- शाकल्य- सेनक- स्फोटायनाः । एतेषां नामानि पाणिनिसूत्रेषु समुपलभ्यन्ते , पाणिनितः पूर्वे वैयाकरणाः लौकिकमात्रं वैदिकमात्रं वा व्याकरणं लिखन्ति स्म । अतस्तेषां व्याकरणानि सर्वाङ्गाणि नाऽभूवन् । अनेन तु लौकिकवैदिकोभयविधं व्यारकणं रचितमिति अस्य वैशिष्टयम् व्याकरणस्य। अथ च पाणिनीयव्याकरणस्य बैज्ञानिकत्वम् । संज्ञाप्रत्याहारगणपाठादिषु सङ्घटितमिदमिति वैज्ञानिकत्वमस्य । प्राचीनानां व्याकरणानां दोषाणां परिमार्जनोद्देश्येनापि इदं रचितमिति अस्य सर्वोत्कृष्टत्वमभूत् ।पाणिन्यनन्तरं केनापि मूलं व्याकरणं न लिखितमिति अस्य सम्पूर्णत्वम् । एवञ्च पाणिनिस्तदीयं व्याकरणञ्च भाषिके क्षेत्रे महत् आश्चर्यजातमस्ति।

५. संस्कृतव्याकरणस्य शब्दग्रन्था अर्थग्रन्थाश्च-

प्रतिपाद्यदृष्ट्या संस्कृतव्याकरणे द्विधा विचारा दृश्यन्ते–शब्दपरा अर्थपराश्च । तत्प्रतिपादका : शब्दग्रन्था अर्थग्रन्थाश्चोच्यन्ते । शब्दग्रन्थाः महाभाष्य-काशिका- सिद्धान्तकौमुदी- प्रौढमनोरमा- शेखरादयः । अर्थग्रन्थाश्च वाक्यपदीय- भूषणसार- वैयाकरणसिद्धान्तमञ्जूषादयः । अर्थग्रन्थाश्शब्दग्रन्थाश्च पाणिनि-सूत्रस्थार्थनिर्देशनमूलाः । अष्टाध्यायीव्याख्यानमपि द्विधा अष्टाध्यायीक्रमेण प्रक्रियाक्रमेण च । महाभाष्य-काशिकादयः पूर्वक्रमाः । रूपावतार- रूपमाला प्रक्रियाकौमुदी सिद्धान्तकौमुद्यादयश्च प्रक्रियाक्रमाः । सूत्रक्रमेणाध्यापनं नेपाले च भवति, आवश्यकन्तु तदपि । इदानीं पाणिनीयमेव व्याकरणं सर्वासु कक्षासु पठ्यमानमस्तीति ज्ञेयम् ।

६. उपसंहारः

व्याकरणं सृष्टिसमये एव ब्रह्मणा सृष्टम् । इन्द्रेण च लिपिबद्धकरणं कृतम । तच्च लक्ष्यलक्षणसमुदितरूपम् । व्याकरणाध्ययनेन भाषा शुद्धा सुसङ्घटिता संक्षेपमूला च वक्तुं लिखितुञ्च शक्यते । व्याकरणं भाषाया रक्षाकवचमिति बहुकालं यावत् भाषां रक्षति । अनेकेषु संस्कृतव्याकरणेषु पाणिनीयमेव व्याकरणं धातु-प्रत्याहार-संज्ञा-सर्वाङ्गपूर्णम, उभयविधानां साधुत्वविधानात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गणपाठादिमूलकत्वाच्च । अत एवास्यैव व्याकरणस्याध्ययनाध्यापने भवतो नेपाले भारते च ।

एवं संस्कृत-वाङ्मयमवबोद्धुम् ततोऽनेकान् लाभान् लब्धुञ्च संस्कृत-व्याकरणं ज्ञेयं सर्वैः । पाणिनि व्याकरणस्य शब्दग्रन्थानामर्थग्रन्थानाञ्चाध्ययनेन शाब्दिकत्वं दार्शनिकत्वं ज्ञानविज्ञानवेत्तृत्वञ्चात्मनि उपार्जयितुञ्च संस्कृतव्याकरणेन वयं सन्निकटाः परिचिताश्च भवेम इति इदानीन्तनमावश्यकत्वम् ।

ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवेशिका परीक्षा (संस्कृत भाषा) प्रशिक्षणकार्यक्रमान्तर्गता)
२०५१

विषय : अनिवार्यव्याकरणम्

पूर्णाङ्का : १००
पत्रम् – प्रथमम् ।

समय : - घण्टात्रयम् ।

क) परीक्षार्थिभि : प्रश्नोत्तरं यथासम्भवं स्वकीयैःशब्दैर्लेखनीयम् ।
ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

१–अक्-एच्-यण्-झश्-खर-प्रत्याहाराक्षराणि प्रदर्श्यन्ताम् ? १०

अथवा

२- लोप-प्रत्याहार- सवर्ण-गुण-धातुसंज्ञाविधायकानि सूत्राणि विलिख्यन्ताम् ?

(क) सन्धि विच्छेदं कुरुत ? ५

कवीश्वरः ,प्रत्येकम् , देवर्षि : , एकैकम्, निश्चितम् ।

(ख) वृद्धि-श्चुत्व-उत्व विधायेकेषु सूत्रद्वयं लिखत ? ५

३- रामः , कवयः , वारिणा, राजानः, श्रीमान, वयं, त्रयः, एषु विशेषसूत्रप्रदर्शनपूर्वकं पञ्चानां साधुत्वं विधीयताम् ? २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४- राम-वारि -सीता-विद्यार्थिन्-अस्मद् शव्दानां प्रथमाविभक्तौ रूपाणि प्रदर्शनीयानि ? १०

अथवा

"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा," "ध्रुवमपायेऽपादानम् " "आधारोऽधिकरणम्"एतेषु द्वयो : सूत्रयोः संस्कृतभाषायां नेपालीभाषायां वा अर्थो विलिख्यताम् ?

५- श्रु-गम्लृ-हन्-ओहाक्-चुरधातुनां लटि प्रथमपुरुषस्य रूपाणि प्रदर्श्यन्ताम् ? १०

६- (क) अधोनिर्दिष्टवाक्येषु पञ्चवाक्यानां संस्कृतभाषायायामनुवादो विधीयताम् ? १०

रमेश र दिनेश पढ्न जाउन् । पाहुनाहरु भोलि आउनेछन्। सिपाहीहरु लट्ठीले चोरलाई पिट्छन् । गुरुले छात्रलाई पुरस्कार दिनुभयो । सैनिक घोडाबाट खस्छ ।

धेरै कविहरुले हिमालयको वर्णन गरेका छन् । राजमार्गमा मोटररु चल्छन् । यसतलाउमा कमलका फूल फुलेका छन् । सज्जन पाप देखि डराउँछन् । सरस्वती विद्याकी देवी हुन् ।

(ख) अधोलिखितवाक्येषु पञ्चवाक्यानां नेपालीभाषायामनुवादो विधियताम् ? १०

आधुनिकं युगमार्थिकं युगम् । उत्पादनवृद्ध्या अर्थप्राप्तिर्भवति । अत सर्वैः जनैः उत्पादनवृद्धिः कर्तव्या । उत्पादनस्याभावे किमपि भवितुं न शक्नोति । केवलं योजनानां निर्माणेन वादविवादाभ्यां च उत्पादनं न वर्धते । आलस्यं विहाय परिश्रमेण कार्यं सर्वैः कर्तव्यम् । सत्पुरुपा स्वहितचिन्तां विहाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदैव परहितं चिन्तयन्ति। दुर्जनाः निष्कारणं सरलान् जीवान् पीडयन्ति । दुष्टानां सङ्गतिः अनर्थकारिणी भवति । संसर्गजाः दोषगुणा भवन्ति इत्युक्तिः अस्ति ।

७. अधोलिखितेषु कमप्येकं विषयमवलम्ब्य संस्कृतभाषायां निबन्धो विरच्यताम् - -२०

(क) सत्सङ्गतिः ।

(ख) अस्माकं हिमालयः ।

(ग) विद्यामहिमा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवेशिकापरीक्षा (संस्कृतभाषाप्रशिक्षणकार्यक्रमान्तर्गता)
२०५२

विषय : अनिवार्यव्याकरणम्

पूर्णाङ्का : १००
पत्रम् – प्रथमम् ।

समय : - घण्टात्रयम् ।

क) परीक्षार्थिभि : प्रश्नोत्तरं यथासम्भवं स्वकीयैःशब्दैर्लेखनीयम् ।
ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

१– अधोलिखितेषु पञ्चसु केषाञ्चित् चर्तुणामुत्तरं लिखत –४×५= २०
(क) अण, इक्, यम्, शल् प्रत्याहाराक्षराणि प्रदर्शयत ?
(ख) लोप-पद-वृद्धि-धातुसंज्ञाविधायकानि सूत्राणि लिखत ?
(ग) श्रीशः, तट्टीका, हरिं वन्दे, विष्णुस्त्राता, इत्येतेष सन्धिविच्छेदं विधाय सन्धौ मुख्यसूत्राणि लिखत ?
(घ) कर्तुरीप्सिततमं कर्म, आधारोऽधिकरणम् , अनयं सोदाहरणमर्थ्यो लेख्यः ?
(ङ) परा, अप,अनु, वि ,अति , इत्येतैरुपसर्गैर्युक्तान् शब्दान लिखत ?

२- रामाय, सीतया, पित्रा, वारिणे,भानौ, युवां, वयम् , एषु पञ्चानां विशेषसूत्रप्रदर्शनपूर्वकं साधनं विधत्त ? २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा

रामेण,गौरीम्, धातुः, ज्ञानानि, राज्ञे,त्वम्, तस्मै,एतेषु पञ्चानां विशेषसूत्रोल्लेखपूर्वकं साधनं विधत्त ?

३- मातृ, श्रीमत,युवन्, वाच् शब्दानां द्वितीयाविभक्तौ रूपाणि लिखत१०

अथवा

द्विशब्दस्य पुंसि चतुःशब्दस्य स्त्रीलिङ्गेसर्वासु विभक्तिषु रूपाणि लिखत ?

४- स्था, अद्, भुज् धातूनां लटि रूपाणि लिखत ? १०

अथवा

पा, धातोर्लृटि डुकृञ् धातोर्लङि रूपाणि लिखत ?

५- अधोनिर्दिष्टेषु पञ्चवाक्यानां संस्कृतेऽनुवादं कुरुत ? १०

परीक्षा राम्ररी लेख । ज्ञान नै सर्वोत्तम हुन्छ । ऋषिहरु हिमालयका गुफामा बस्छन । कन्याहरू कोमल हातले फूल टिप्नेछन् । मूर्ख युवाहरु लट्ठीले बाटो छेक्नेछन् । बालक आमाको काखमा शिर राखेर सुत्छ । गुरुले योग्य छात्रलाई पुरस्कार दिनुभयो । तीन ओटी बालिका र चार ओटा बालकहरुले पुरस्कार पाउने छन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६- आधोलिखितवाक्येषु , पञ्चवाक्यानां नेपाल्यामनुवादं विधत्त ? १०

नहि ज्ञानेन सदृशं पवित्रमिहविद्यते ।
कर्मण्यन्यद् वचस्यन्यद्दुर्जनानां हि लक्षणम् ।
वर्तमान समयः स्वदेश निर्माणस्य समयोऽस्ति । केवलं
भाषणेनोपदेशेन देशोन्नतिर्नहि सिद्धयति ।
देशसेवाकर्मणि सर्वैः क्रियाशीलै : स्वार्थरहितैश्च भाव्यम् ।
परस्परस्य द्रोहबुद्ध्या बुद्धिर्नश्यति । सत्पुरुषा धनं तिरस्कृत्य
मानमेव पुरस्कृत्य देशसेवां चिन्तयन्ति । अतो देशस्य कृते ये जीवनं
समर्पयन्ति त एव महान्तो भविष्यन्ति ।

७- अधोनिदिर्ष्टेषु कमप्येकं विषयमवलम्ब्य संस्कृतभाषायां निबन्धं रचयत । १०
(क) संस्कृतस्योपयोगिता (द) अनुशासनम् (ग) बसन्तर्तु : ।

=00=

23432
23532

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu